February. 1927.

THE

CHOWKHAMBÂ SANSKRIT SERIES,

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS

NO. 350

मीमांसाकौस्तुभः ।

(मीमांसासूत्रोपरि काचन विस्तृता टीका)

(द्वितीयाध्यायस्य तृतीयचतुर्थौ पादौ ।)

पूर्वोत्तरमीमांसापारावारपारीण-

श्रीखण्डदेवविरचितः

श्रीकाशीहिन्दूविश्वविद्यालयपूर्वमीमांसाप्रधानाध्यापकेन

वेदविशारदबिरुदभाजा

अ. चिन्नस्वामिशास्त्रिणा

संशोधितः श्रीजयकृष्णदासगुप्तेन मुद्रापितो विजयताम् ।

MIMAMSA KAUSTUBHA

[An exhaustive Commentary of Jaiminisutra]

(III & IV Padas of II Adhyaya)

BY

Sri KHANDADEVA.

Edited by

Veda Visarada Pandit A. Chinnaswami Sastri,

Chief Professor of Mimamsa Benares Hindu University

Vol. II. FASCICULUS I–१.

PUBLISHED & SOLD BY THE SECRETARY,

CHOWKHAMBA SANSKRIT SERIES OFFICE, BENARES

Printed by Jai Krishna Das Gupta,

Vidya Vilas Press, Benares.

1927

Agents:

1 Luzac & co, Booksellers,
LONDON

2 Otto Harrassowitz, Leipzig
GERMANY.

3 The Oriental Book-supplying Agency,
POONA.

श्रियै नमः ।

मीमांसाकौस्तुभः ।

द्वितीयाध्यायस्य तृतीयः पादः । (रथन्तरपादः)

प्रथमं रथन्तराधिकरणम् (१) ॥

सू-गुणस्तु क्रतुसंयोगात्, कर्मान्तरं प्रयोजयेत् संयोगस्याशेषभूतत्वात् ॥ २-३-१. ॥ (पू)

ज्योतिष्टोमे-"यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयात्" "यदि बृहत्सामा शुक्राग्रान्" "यदि जगत्सामा आग्रयणाग्रान्" इति श्रुतम् । तत्र किमाद्ययोः वाक्ययोः रथन्तरसामत्वे बृहत्सामत्वे च निमित्ते ज्योतिष्टोमापूर्वसाधनीभूतग्रहणानुवादेनैन्द्रवायवाग्रता शुक्राग्रता च यथायोगं विधीयेते, अथ वा रथन्तरसामत्वैन्द्रवायवाग्रत्वाद्युभयविशिष्टकर्मान्तरं विधीयते इति सन्देहः ।

अत्र कृतिसाध्यत्वेनानिश्चितविधेयताकगुणप्रयोज्यभेदनिरूपणं पादार्थः । पूर्वपादे हि वाजिनादयो गुणाः पक्षद्वये निश्चितविधेयताका एव भेदकत्वेन (१)निर्धारिताः । अत्र तु रथन्तरसा-

१. विचारिताः,

मत्वं गुणः पूर्वपक्षे विधेयः, सिद्धान्ते त्वविधेय इत्यनिश्चितविधेयताकः । अतोऽस्ति पादसङ्गतिः । यथाचायं पादार्थः सर्वत्राप्यविरुद्धः तथा तत्तदधिकरणे निरूपयिष्यामः ।

अध्यायसङ्गतिस्तु स्पष्टा । अनन्तरा तु दृष्टः (१)सौभरसम्बन्धित्वेन प्रमाणान्तरप्राप्तत्वात् युक्तं हीषूनियमं प्रति निमित्तत्वम् । अत्र तु केवलरथन्तरसामकत्वस्य समासार्थभूतस्य ज्योतिष्टोमेऽप्राप्तत्वात् न ग्रहाग्रताया निमित्तत्वोपपत्तिरिति पूर्वपक्षोत्थानाद्द्रष्टव्या ।

तत्र यद्यपि यदिशब्दः(२) "यदि राजन्यं वैश्यं वा याजये" दित्यादौ निमित्तत्वपरो दृष्टः, तथापि अत्र विशेषणस्य विशेष्यस्य विशिष्टस्य वा निमित्तत्वासम्भवात् न नैमित्तिको गुणः (३)प्रकृते विधातुं शक्यते । तथा हि—

न तावदत्र विशेषणस्य रथन्तरसामत्वादेः निमित्तत्वम्, बहुव्रीह्यन्तपदे प्रथमोपनिपतितस्य रथन्तरादिशब्दस्य अन्यपदार्थोपसर्जनीभूतस्वार्थप्रतिपादकत्वेन तस्मिन् यदिशब्दोपात्तनिमित्तत्वान्वयानुपपत्तेः, अन्यथा ऋद्धस्येति षष्ठ्यन्तस्यापि राजपुरुष इति पदोपात्ते राज्ञि अन्वयापत्तेः, रथन्तरमा-

१. तत्संज्ञकस्सामविशेषः ।

२. "यदि राजन्यं वैश्यं वा याजयेत्, स यदि सोमं बिभक्षयिषेत्, न्यग्रोधस्तिभिनीराहृत्य तास्संपिष्य दधन्युन्मृज्य तमस्मै भक्षं प्रयच्छेत् न सोमम्" इत्यत्र राजन्यवैश्यान्यतरकर्तृकत्वे निमित्ते भक्षोद्देशेन सोमस्थाने फलचमसविधिपरे वाक्ये यदिशब्दस्य यथा निमित्तत्वपरता तद्वदित्यर्थः । स्तिभिन्यः फलानि । अस्यैव फलचमस इति संज्ञा ।

३. प्रकृतक्रत्वङ्गतया ।

त्रस्य निमित्तत्वे (१)अग्नावपि विद्यमानस्य निमित्तत्वापत्तेश्च ।

नाप्यन्यपदार्थरूपस्य विशेष्यस्य; स हि सोमपदसमभिव्याहारात् सोमद्रव्यं भवेत्; तस्य तु नित्यत्वादेव यदिशब्दोपात्तकादाचित्कत्वव्याप्त्यनिमित्तत्वानुपपत्तिः । कथञ्चित् निमित्तत्वाङ्गीकारेऽपि वा ऐन्द्रवायवाग्रत्वशुक्राग्रत्वयोः विकल्पापत्तिः; बहुव्रीह्यन्तपदवैयर्थ्यापत्तिश्च । एतेन सोमशब्देन स्वसाध्यं प्रकृतं यागं लक्षयित्वा तस्यैव निमित्तत्वाङ्गीकारः प्रत्युक्तः ।

नापि विशिष्टस्य, (२)हविरुभयत्ववद्वाक्यभेदापत्तेः । किञ्च वैशिष्ट्यपक्षेऽपि अन्यपदार्थो विशेषणम् ? विशेष्यं वा, ? (३) नाद्यः; व्युत्पत्तिभङ्गापत्तेः । न च विग्रहवेलायां अन्यपदार्थस्य षष्ठ्यन्तत्वेन विशेषणत्वात् रथन्तरस्य प्रथमान्तत्वेन विशेष्यत्वात् क्रतुविशिष्टस्य रथन्तरादेः यदिशब्दोपात्तनिमित्तत्वान्वयोपपत्तिरिति वाच्यम् । विग्रहवाक्यस्यावैदिकत्वेन तदुपात्तविशेषणविशेष्यभावेन निमित्तत्वान्वयानुपपत्तेः ।

किञ्च ग्रहाग्रतानिमित्तभूते रथन्तरे न तावत् ज्योतिष्टोमाख्यक्रतोः स्वायोगव्यावृत्त्या विशेषणत्वम्, प्रकरणादेव तत्सिद्धेः । नापि क्रत्वन्तरयोगव्यावृत्त्या ; उपदेशेन तद्व्यावृत्तेः प्रमाणाभावेनैव सिद्धत्वात् । अतिदेशेन तद्व्यावृत्तिस्तु तवापि अनिष्टैव ।

न द्वितीयः; सामान्तराणामपि गायत्रादीनां स्तोत्रान्तर-

---

१. चयने "पृष्ठैरुपतिष्ठते" इत्यनेन उपस्थानाङ्गत्वेन पृष्ठविधानात् तदन्तर्गतत्वात् रथन्तरस्येति भावः ।

२. "यस्योभयं हविरार्तिमार्च्छेत् ऐन्द्रं पञ्चशरावमोदनं निर्वपेत्" इत्यत्र उभयत्वविशिष्टस्य हविषः निमित्तत्वे यथा विशिष्टोद्देश्यत्वरूपो वाक्यभेदः तद्वदित्यर्थः ।

३. बहुव्रीहेरन्यपदार्थविशेष्यकबोधजनकत्वनियमभङ्गापत्तेरित्यर्थः ।

सम्बन्धितया ज्योतिष्टोमे विशिष्य विहितत्वेन तद्व्यावृत्त्या रथन्तरादेः विशेषणत्वानुपपत्तेः, यद्यपि च स्वसाध्यपृष्ठस्तोत्रे वैकल्पिकपृष्ठस्तोत्रान्तरसाधनबृहद्व्यावर्तकत्वं रथन्तरस्य, रथन्तरव्यावर्तकत्वं वा बृहतः सम्भवति तथापि समुच्चितस्तोत्रान्तरसाधनसामान्तरव्यावृत्त्यसम्भवात् सापेक्षस्य रथन्तरादेः अन्यपदार्थविशेषणत्वे सामर्थ्यभङ्गप्रसङ्गेन समासानुपपत्तेः वैशिष्ट्यानुपपत्तिः ।

अत एव रथन्तरस्य पाक्षिकत्वादग्रताविशेषनिमित्तभूते क्रतौ स्वायोगव्यावृत्त्या विशेषणत्वमित्यप्यपास्तम् । शङ्खः पाण्डुर एवे" त्यादौ पाण्डुरत्वादेः विशेष्ये अवच्छेदकावच्छेदेनैव स्वायोगव्यावृत्त्या विशेषणत्वदर्शनेन प्रकृते तदसम्भवात् । न हि गायत्रादिसामान्तरकार्यावच्छिन्ने क्रतौ शक्यो रथन्तरायोगो व्यावर्तयितुम् ।

न चैकदेशेऽपि तद्व्यावृत्त्या विशेषणत्वव्यवहारः; अव्याप्यवृत्तिनीलवति नीलो घटः इति व्यवहारादर्शनात् । अतश्च रथन्तरमेवास्य सामेति समासार्थावगमात् तस्य च (१)प्रकृते अप्राप्तत्वेन निमित्तत्वानुपपत्तेः विधेयत्वावगमात्, प्रकृते च ज्योतिष्टोमे केवलरथन्तरसामकत्वादेः विधाने ऐन्द्रवायवाग्रत्वादेरपि विधेयत्वाद्वाक्यभेदापत्तेः, वाक्यभेदाङ्गीकारेऽपि च केवलरथन्तरसाम्नो ज्योतिष्टोमे साक्षादनन्वयेन स्तोत्रसाधनीभूतमन्त्रद्वारैव निवेशस्य वाच्यत्वात् तेषु च तत्तत्सामान्तरस्य विशिष्याम्नानसिद्धत्वेन विषमशिष्टविकल्पायोगात् अनिविशमानस्य रथन्तरमात्रसामकत्वादेः गुणस्य भेदकत्वावगतेः गुणद्वयविशिष्टकर्मान्तरविधिरेवायम् । तत्राव्यक्तत्वात् अतिदेशप्राप्तसर्वस्तोत्रेषु रथन्तरसाम्नो निवेशः ।

१, प्रकरणं

न च "उक्थ्यो वैरूपसामे" त्यादाविव पृष्ठस्तोत्र एव निवेशः शङ्क्यः । एतदधिकरणपूर्वपक्षवादिना एकदेशसंयोगानंगीकारेण (१)वैरूपादीनामपि सर्वस्तोत्रे निवेशस्य वाच्यत्वात् । अतएवैतदधिकरणसिद्धान्ते एकदेशसंयोगे स्थिते बहुव्रीह्यन्तत्वसादृश्येन वैरूपादीनां पृष्ठस्तोत्र एव निवेशो (२)दशमे वक्ष्यते ।

(३)न च विधायकस्य स्यादित्यादेः यदिशब्दोपहतविधिशक्तिकत्वात् कर्मान्तरविधायकत्वानुपपत्तिः । यदिशब्दस्याप्राप्तिद्योतकमात्रत्वेन प्रमाणान्तरेण प्राप्त्यसम्भवे(४)'यदाग्नेय' इत्यादिवदविवक्षितार्थत्वात् ।

अथ वा यदिशब्दपरित्यागात् वरमध्याहारः । तेन यागानुकूलप्रवृत्तिजनकीभूताया इच्छायाः विधिना आक्षिप्तायाः यदिशब्दोपात्तनिमित्तत्वान्वयार्थं वाचकीभूतरुचिधात्वध्याहारः क्रियते । अतश्च कर्मान्तरस्य प्रकरणात् ज्योतिष्टोमाङ्गस्य सोमवाक्यविहितयागसमप्रधानस्य वा पाक्षिकत्वसिध्यर्थं रुचेर्निमित्तत्वकल्पनमिति न वैयर्थ्यमपि ।

अथ वा अध्याहारादपि निपातोपसर्गाणामनेकार्थत्वात् यदिशब्दस्य' यदि वेदाः प्रमाणम्' इति वदेवकारार्थत्वपरिकल्पनैव भवदेवोक्ता युक्ता समाश्रयितुम् । अतश्च प्रयाजादिवत् कर्मान्त-

---

१. वैरूपं तत्संज्ञकस्मामविशेषः ।

२. पू. मी. १०–६–६.

३. इत आरभ्य पूर्वपक्षसमाप्तिपर्यन्तो ग्रन्थः "यदि शब्दपरित्यागो रुच्यध्याहारकल्पना । व्यवधानेन सम्बन्धो हेतुहेतुमतोश्च लिङ्" (तं. वा. पृ. ५८१.) इति वार्तिकस्यैव विवरणरूपो द्रष्टव्यः ।

४. 'यदाग्नेयोऽष्टाकपालोऽमावास्यायाञ्च पौर्णमास्याञ्चाच्युतो भवती'त्यत्र सत्यपि यच्छब्दसमभिव्याहारे तदर्थस्याविवक्षामङ्गीकृत्याप्राप्तत्वात् यथा विधायकत्वमङ्गीक्रियते तद्वदित्यर्थः ।

रस्यापि नियमेनैव प्रयोगविधिना सङ्ग्रहात् यदिशब्दोऽप्याव- श्यकत्वानुवादः ।

वस्तुतस्तु-पक्षत्रयमपि आख्यातद्वयस्य भिन्नवाक्यतापत्तेः तद- ङ्गीकारेऽपि च केवलरथन्तरसामकत्वस्योत्पत्तिशिष्टसामान्तराविरो- धाभावेन प्रकृत एव ज्योतिष्टोमे निवेष्टुं शक्यतया कर्मान्तरा- नापादकत्वापत्तेरयुक्तम् । न च सामान्तराणां विशिष्याम्नात- त्वेन बलवत्त्वम् । एतस्यापि प्रधानाश्रितस्य विशिष्याम्नानावि- शेषेण ततो बलवत्त्वात् ।

अत एवं परिहर्तव्यम्-(१)"कामप्रवेदनेऽकच्चिति" इति स्मृत्या कच्चित्पदाप्रयोगे कामशब्दाभिधेयाया इच्छायाः अपि लिङ्लक्ष्यत्वस्य अनुशासनात् गृह्णीयादिति लिङा इच्छावगमेन यदिशब्दस्य च तत्र व्यवहितान्वयं कृत्वा, यदि ऐन्द्रवायवा- ग्रान् ग्रहान् ग्रहीतुमिच्छेत् तदा केवलरथन्तरसामानं क्रतुं कुर्वीतेति वाक्यार्थप्रतीतेरेकवाक्यत्वोपपत्तिः । अस्मिन् हि पक्षे स्यादिति लिङैव गुणद्वयविशिष्टयागविधानम् । गृह्णीयात् इति लिङा तु यदिशब्दतात्पर्यग्राहकसहकृतेनेच्छामात्रोपादानमिति न वाक्यभेदः । तत्प्रयोजनं च एकवाक्यतापादनद्वारा स्ववा- क्योपात्तकर्मान्तरप्रयुक्तत्वसूचनमुखेन तदङ्गत्वबोधनात् प्राकरणि- कज्योतिष्टोमाङ्गत्वव्यावृत्तिः । भिन्नवाक्यत्वे हि ग्रहाग्रतायाः कर्मान्तराङ्गत्वे प्रमाणाभावेन प्रकरणात् ज्योतिष्टोमाङ्गत्वमेव स्यात् ।

न च "यदि रथन्तरसामा सोमस्स्यात् सौभरेण स्तुवीत" इति रथन्तरसामकयागपुरस्कारेणाग्रेऽपि गुणविधानात् अवा-

---

१. पा. सू. ३-३-१५२.

न्तरप्रकरणात् कर्मान्तराङ्गत्वोपपत्तिरिति न्यायसुधाकृदुक्तं शङ्क्यम् । सौभरविधेः बृहत्सामककर्मान्तरादिविधिव्यवहितत्वेन अतिरात्रसंस्थावान्तरप्रकरणस्थत्वेन च सन्देशाभिव्यञ्जकत्वाभावात् । अतो युक्त एव स्याच्छशब्दस्य विधायकत्वेऽपि यदिशब्दसंयोगः ।

नन्विदं "कामप्रवेदनेऽकच्चिति" इति सूत्रस्य इच्छायां लिङित्यर्थकत्वे भवेत् । तस्य तु कामप्रवेदने प्रकारान्तरेण गम्यमाने सर्वलकारापवादत्वेन लिङो विधानमित्येवंपरतया काशिकाकारेण व्याख्यानात् कामो मे भुञ्जीत भवान् इत्युदाहरणस्योक्तत्वात् कथं लिङ एवेच्छार्थकत्वमिति चेत् ?

कामप्रवेदने कर्तव्ये लिङ् इत्येव सूत्रार्थोपपत्तौ प्रकारान्तरेणेत्यस्याध्याहारे गौरवात् (१)"इच्छार्थेषु लिङ्लोटौ" इति सूत्रे महाभाष्यकारेण कामप्रवेदने चेत् इच्छार्थेभ्य उपपदेभ्यो गम्यमान इत्येव व्याख्यातत्वेन विवक्षितार्थस्य तेनैव सिद्धौ 'कामप्रवेदन' इति सूत्रस्य वैयर्थ्यापत्तेश्च । अतः काशिकापूर्वकालीनैः शबरादिभिर्व्याख्यातत्वात् इच्छायामेव लिङ् इति सूत्रार्थः ।

यदपि पदमञ्जर्यादौ पौनरुक्त्यं परिहृतम्—यत्र अर्थः प्रकरणादिनापि कामप्रवेदनं गम्यते तत्र 'कामप्रवेदन' इति सूत्रम्, यत्र तु तद्वाचकशब्दप्रयोगः तत्रे'च्छार्थेष्वि'त्यस्य सूत्रस्य सार्थकत्वाल्लोडर्थकत्वम् । तत्र लोटा च लिङो बाधो माभूदिति लिङप्युक्त इति, तदप्यपास्तम्; शबरादिप्रदर्शितव्याख्याने पौनरुक्तस्यैवाप्रसक्ता(२)वुक्तविधया तत्परिहारस्यानुक्तिसहत्वात् । तस्मादिच्छायामपि लिङिष्ट इति युक्त एवोक्तविधया यदिशब्दः ।

अथ वा व्यवहितान्वयस्याप्यन्याय्यत्वात् (३)"हेतुहेतुमतो-

१. पा. सू. ३-३-१५७. २. उक्तविधपरिहाराभासस्य
३. पा. सू. ३-३-१५६.

ङिङि" ति स्मृत्या प्रयोजकापरपर्याये हेतौ, प्रयोज्यापरपर्याये हेतुमति च लिङो विधानात् यदिशब्दस्य च तदर्थतात्पर्यग्राहकत्वेन स्यादिति हेतौ लिङ्, गृह्णीयादिति विधौ। तेन कर्मान्तरहेतुको ग्रहाग्रताविशेषः कर्तव्य इति वाक्यार्थः। अस्मिंश्च पक्षे आर्थिकः कर्मान्तरविधिः। हेतुत्वाभिधानस्य च ज्योतिष्टोमाङ्गताव्यावृत्तिफलककर्मान्तराङ्गत्वसिद्धिरेव पूर्ववत् फलम्। अङ्गिविशेषकबोधस्य न्याय्यत्वात् गृह्णीयादिति वा हेतुमति लिङ्, स्यादिति च विधौ; तदा च ग्रहाग्रता(१)हेतुकं रथन्तरसामानं क्रतुं कुर्वीतेति वाक्यार्थः। हेतुमत्ताभिधानस्य च पूर्ववदेव प्रयोजनम्। अस्मिंश्च पक्षे यदिशब्दो यथास्थानस्थित एव एकस्याख्यातस्य विधायकतामपरस्य हेतुमदर्थकतां सूचयतीति न व्यवहितकल्पनापि। विशेष्यावगमोत्तरविशेषणावगमरूपाविमृष्टविधेयांशता तु पटोऽस्ति शुक्ल इतिवन्न दोषाय। तस्मात् यदिशब्दस्य (२)"यदि ब्राह्मणो यजेते"ति वत् विधिशक्तिविघातकत्वाविघातः।

सूत्रं तु अन्यपदार्थरूपक्रतुसंयोगे यो गुणः केवलरथन्तरसामत्वादिरूपः स कर्मान्तरं प्रयोजयेत्, विशेषणसंयोगस्य विशेष्यावच्छेदेन वृत्तिस्वाभाव्यादिति व्याख्येयम्॥

(इति रथन्तराधिकरणपूर्वपक्षः)

---

१. प्रयोज्यताकं।

२. "यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वा तमभिघारयेत्" इत्यत्र यदि शब्दस्य यथा न विधिशक्तिप्रतिबन्धकत्वं तद्वदित्यर्थः। एतच्चाग्रिमाधिकरणे स्पष्टीभविष्यति।

(अथ सिद्धान्तः)

सू-एकस्य तु लिङ्गभेदात् प्रयोजनार्थमुच्येतैकत्वं गुणवाक्यत्वात् ॥ २-३-२. ॥ (सि)

न तावद्यदिशब्दोपात्तनिमित्तत्वं रथन्तरविशिष्टस्य क्रतोरुच्यमानमपि समासं भिनत्ति, बृहद्रथन्तरसाध्यपृष्ठयोः ज्योतिष्टोमे वैकल्पिकत्वेन स्वायोगव्यावृत्त्यापि विशेषणत्वसम्भवात् एकार्थीभावलक्षणसामर्थ्यविघातानुपपत्तेः । न च विशेष्यावच्छेदेनैव विशेषणेन स्वायोगो व्यावर्तनीयः इत्यपि नियमोऽस्ति । दण्डी पुरुष इत्यादौ व्यभिचारात् ।

किञ्च स्वावान्तरकार्यद्वारा सर्वेणापि विशेषणेन विशेष्यमवच्छेत्तव्यम् । अत एव व्याप्यवृत्तिताप्यवान्तरकार्य एव द्रष्टव्या । अस्ति च बृहद्रथन्तरयोः पृष्ठरूपावान्तरकार्ये सा । ततस्तद्द्वारा क्रत्वावच्छेदकावच्छेदेन सा अव्याहतैव । न हि कर्मान्तरत्ववादिनापि प्रोक्षणावघातादिष्वव्ययोगो व्यावर्तनीयः । अपि तु स्तोत्रादिरूपावान्तरकार्य एव । तत्र च प्रोक्षणादीनामिव स्तोत्रान्तराणामपि बृहद्रथन्तरकार्यत्वाभावात् तेष्वयोगव्यावृत्तावपि न क्षतिः । अतश्च पृष्ठस्तोत्रावच्छेदेनायोगव्यावृत्तेः सत्वात् व्याप्यवृत्तितया विशेषणत्वाविरोधः । किञ्चानयैव दिशा परस्परव्यावर्तकत्वादन्ययोगव्यावृत्त्यापि विशेषणत्वोपपत्तिः ।

किञ्चैवं यद्यपि बृहद्रथन्तरयोस्समुच्चयो भवेत् तथापि साम्नां तत्तद्वाक्ये निरपेक्षसाधनत्वावगमेन समुच्चयेऽपि व्यासज्यवृत्तिसाधनत्वाभावात् नाग्नेयैन्द्रपीतादिवत् असामर्थ्यमिसेकेना-

पि विशेषणतोपपत्तिः। इष्यत एव हि डित्थडवित्थयोर्मातरि डित्थमातेति प्रयोगः, अनेकच्छन्दस्केऽपि च प्रातस्सवने गायत्रच्छन्दस इति प्रयोगः। अत एव रथन्तरसामेति व्यपदेशोपपत्तात्रापि यदिशब्दोपात्तनिमित्तत्वान्वयार्थं बृहद्रथन्तरयोः वैकल्पिकत्वोपन्यास इति द्रष्टव्यम्। तेन सिद्धं रथन्तरविशिष्टस्य क्रतोर्निमित्तत्वमिति।

वस्तुतस्तु विशिष्टोद्देशे वाक्यभेदापत्तेः न क्रतुविशिष्टरथन्तरवदेव रथन्तरविशिष्टक्रतोरिह निमित्तत्वम्। न च(१) हविरार्तिन्यायेन उद्देश्यान्तर्गत्यङ्गीकारात् न वाक्यभेदापत्तिरिति भवदेशोक्तं शङ्क्यम्। वक्ष्यमाणरीत्या रथन्तरस्यैव निमित्तत्वपर्यवसानोपपत्तौ क्रतोरपि तदन्तर्भावस्योभयत्ववदप्रामाणिकत्वात्।

किञ्च क्रतोरप्यन्तर्भावे प्रकृतत्वात् ज्योतिष्टोमे एवान्तर्भाव्येत, ततश्च ज्योतिष्टोमे निमित्ते प्रकृतापूर्वसाधनीभूतग्रहणाङ्गत्वेनाग्रता विधीयते। ततश्च विकृतौ तदपूर्वस्थानापन्नत्वात् अङ्गितावच्छेदकसद्भावेऽपि निमित्ताभावात् भेदनरहितायां विकृतौ तद्धोमवत् नैवाग्रताविशेषः प्राप्येत। न हि निमित्तपदे अपूर्वसाधनलक्षणा निमित्तस्थानापत्तिर्वा वैकृतक्रतोरस्ति, येन तत्रैव निमित्तान्तर्भावश्शङ्क्येत। अतो विशिष्टस्य क्रतु-

---

१ "यस्योभयं हविरार्तिमार्च्छेत्, ऐन्द्रं पञ्चशरावमोदनं निर्वपेत्"इत्यत्र केवलाया आर्तेः सार्वदिकत्वेन निमित्तत्वासम्भवात् तद्विशेषणस्यापि हविषः उद्देश्यकुक्षौ प्रवेशमङ्गीकृत्य हविरार्तेरेवोद्देश्यत्वमङ्गीकृतं तद्वदत्रापि रथन्तरस्यापि उद्देश्यकोटौ प्रवेशमङ्गीकृत्य वाक्यभेदः परिह्रियतामित्यर्थः। यस्य यजमानस्य दर्शसम्बन्धि सायंकालिकं हविः दधिरूपं प्रातःकालिकं हविः पयोरूपं च नश्यति स ऐन्द्रं शरावपञ्चकपक्वौदनद्रव्यकं यागं कुर्यात् इति विषयवाक्यार्थः।

मात्रस्य वा निमित्तत्वायोगात् रथन्तरस्यैव निमित्तत्वम् ।

यद्यपि च परोपसर्जनीभूते पदार्थान्वयोऽव्युत्पन्नः तथापि शाब्दबोधे विशिष्ट एवान्वितस्यापि निमित्तत्वस्य विशेष्ये विशिष्टे वा कादाचित्कत्वाभावादिना बाधात् "सविशेषणे विधिनिषेधौ विशेषणे सङ्क्रामतो विशेष्यबाधे" इति न्यायेन 'स्वर्गी ध्वस्तो' 'लोहितोष्णीषा' इत्यादिवद्विशेषणीभूतेऽपि रथन्तरभामत्वे सङ्क्रमणं नानुपपन्नम् । इष्यत एव चोद्देश्यस्थलेऽपि स्वर्गकामपदे विशेषणीभूतेऽपि स्वर्गे भाव्यतासङ्क्रमणम् ।

अस्तु वा एतादृशविषये तद्वदेव समस्तपदे रथन्तरविशेष्यत्वलक्षणा, तथापि उपक्रमस्थयदिशब्दत्यागापेक्षयाऽसौ न दोष एव । अतः रथन्तरमेव निमित्तम् । अन्यपदार्थविशेषणता तु प्रकरणलभ्यत्वादनुवादः । तत्प्रयोजनं च "वैरूपसामे" इत्यादौ बहुव्रीह्युक्तत्वसादृश्येन पृष्ठस्तोत्रमात्रसाधनत्वलाभः, न तु सर्वस्तोत्रसाधनत्वम् । (१)कौत्सादिवद्वा पवमानमात्रसाधनत्वम् । रथन्तरमात्रनिमित्तत्वेऽपि च यदिशब्दोपात्तस्य निमित्तत्वस्य कादाचित्कत्वव्याप्यत्वात् कादाचित्कत्वस्य च बृहद्रथन्तरयोरन्योन्यविरोधप्रयुक्तत्वात् बृहद्विरोधिनो रथन्तरस्य, रथन्तरविरोधिनो वा बृहतः निमित्तता । अत एवान्योन्यविरोधित्वस्य निमित्तस्वभावलभ्यत्वात् न तद्विवक्षाकृतो वाक्यभेदोऽपि ।

विरोधिता च क्वचित् वैकल्पिकत्वात्, क्वचित् बाध-

१. कौत्सं भवति" (ता. ब्रा. १४-११-२५.) काण्वं भवति" वासिष्ठस्य जनित्रे भवतः, (ता. ब्रा. १४-११-२२.) क्रौञ्चानि भवन्ति (ता. ब्रा. १९-३-८.) इति विहितानां कौत्सादीनां साम्नां स्वसमसंख्यकप्राकृतसामबाधकत्वम् । तच्च पवमानस्तोत्र एवेत्युक्तं दशमे तद्वादित्यर्थः ।

कत्वात् । अतएवोभयत्रैव रथन्तरस्य निमित्तता । यथा प्रकृतौ वैकल्पिकत्वात् विकृतावपि च यत्र नैकतरनियमः । यत्र तु तन्नियमः तत्र बाधकत्वात् विरोधिता । यत्र तु द्विविधविरोधिताभावः तत्र सत्यपि रथन्तरादौ न तस्य निमित्तत्वम् । अत एव(१) संसवादौ बृहद्रथन्तरयोः समुच्चयेन सत्वे ऽपि विरोधित्वाभावात् न निमित्तता । यत्र वा विश्वजिदादौ 'पवमाने रथन्तरं, आर्भवे बृहदि' त्यादिवचनात् स्तोत्रान्तरेऽपूर्वविधानेन प्रापकप्रमाणाभावादेवेतरबाधकतानुपपत्तेः न विरोधिता तत्रापि न निमित्तत्वम् । तस्मात् बृहद्विरोधिरथन्तरसामत्वे रथन्तरविरोधिबृहत्सामत्वे वा निमित्ते ऐन्द्रवायवाग्रत्वशुक्राग्रत्वयोः प्रकृतापूर्वसाधनीभूतग्रहोद्देशेन विधानमिति सिद्धम् । निमित्तफलयोश्च विजातीयोद्देश्यताकत्वात(२)यावज्जीवादिवाक्यवत् उद्देश्यानेकत्वनिमित्तोऽपि न वाक्यभेदः । अतश्चैतद्वाक्यद्वयस्यापि निमित्तार्थत्वेनापि नैमित्तिकविधायकत्वोपपत्तेः भेदकप्रमाणाभावात् विशिष्टविधिगौरवापादककर्मान्तरविधायकत्वमन्याय्यमेव ।

नच बृहत्सामत्वे निमित्ते अपामृशुक्रग्रताविधानोपपत्तावपि रथन्तरसामकत्वे(३) धाराग्रहेभ्यः पूर्वमैन्द्रवायवाग्रतायाः पाठादेव

---

१. संसवगोसवादयः सोमयागविशेषाः ।

२. "यावज्जीवमग्निहोत्रं जुहोती" त्यादौ नित्यकर्मस्थले पापक्षयस्याप्युद्देश्यत्वाङ्गीकारावश्यम्भावेन तत्र निमित्तपापक्षययोरुभयोरप्युद्देश्यत्वेऽपि निमित्तस्यानीप्सितत्वेन पापक्षयस्य चेप्सितत्वेन ईप्सितानीप्सितरूपानेकोद्देश्यकत्वेऽपि यथा न वाक्यभेदः तद्वदित्यर्थः ।

३. "अच्छया धारया गृह्णाती" ति विधिना धारया गृहीतव्यतया विहिताः ग्रहाः धाराग्रहाः ।

प्राप्तत्वात्, अधाराग्रहेभ्यः पूर्वमैन्द्रवायवाग्रतावि़धेश्च(१) दशमे निषेत्स्यमानत्वात् तद्वाक्ये विधेयाभावेन कर्मान्तरविधायकत्वोपपत्तिरिति वाच्यम्। पाठेन सम्भवत्प्राप्तिकाया अपि ऐन्द्रवायवाग्रताया निमित्तसम्बन्धेन विधानोपपत्तेः। तत्प्रयोजनं च पाठस्य क्रमनियामकताप्रतिबन्धः। निमित्तं हि स्वसत्त्वे नैमित्तिकावश्यकर्तव्यतां बोधयति। सा च यदि प्रमाणान्तरेण प्राप्ता भवेत् तदा स्वाभावे नैमित्तिकाभावं बोधयतीति युक्तः क्रमनियामकताप्रतिबन्धः। तत्फलमपि च पृष्ठस्तोत्रवृत्तिवैरूपसामवति क्रतौ रथन्तराभावात् क्रमनियमः। प्रकृतावपि यथाशक्त्युपबन्धेन रथन्तरादिराहित्ये सः। तत्सिद्धं वाक्यद्वयेऽपि निमित्तार्थं श्रवणमिति।

आग्रयणाग्रतावाक्यमपि प्रकृतौ विकृतौ वा जगत्संज्ञकसामाभावात् यत्र(२) विषुवति जगत्यामृचि उत्पन्नं महादिवाकीर्त्यं साम तत्र वाक्येन प्रकरणं बाधित्वा आग्रयणाग्रताविधानपरमिति दशमे वक्ष्यमाणत्वात् न कर्मान्तरविधानपरम्। येन तत्साहचर्यादनयोरपि कर्मान्तरविधानमाशङ्क्येत। अत एव तत्रत्यो यदिशब्दोऽपि जगत्साम्नः पाक्षिकत्वाभावेन निमित्तपरत्वासंभवात् यत्रेत्यर्थस्सन्नुत्कर्षपर एव—यत्र जगत्साम तत्राग्रयणाग्रानिति। बहुव्रीह्यन्तं च विषुवल्लक्षकमिति न विशिष्टोद्देशे वाक्यभेदः।

अथ वा अन्यपदार्थस्य अवच्छेदकान्तराभावात् जगत्सामत्वमेव ग्रहत्ववदुद्देश्यतावच्छेदकत्वेन विवक्षितम्। पूर्ववाक्ययोस्तु प्रकृतपरामर्शिसोमपदेन ज्योतिष्टोमस्यैवान्यपदार्थावच्छेदकत्वप्रतीतेः रथन्तरसामत्वस्यापि निमित्तविशेषणत्वे युक्तो वाक्यभेदः।

---

१. १०-५-१७. उपांश्वन्तर्यामौ अधाराग्रहौ।

२. गवामयने एकषष्ट्यधिकशतत्रयसुत्यात्मके (३६१) यो मध्यमो दिवसः स विषुवान्।

वस्तुतस्तु ईदृशस्थले "अश्वाभिधानी" मितिवत् विशिष्टस्य व्युत्पन्नत्वाद्वाक्यभेदाभावेऽपि विशेषणस्य निमित्तान्तर्गत्याशङ्काप्रयोजनाभावादेव निराकर्तव्या । तस्मात् रथन्तरादिनिमित्तकग्रहाग्रताविशेष एव ज्योतिष्टोमाङ्गत्वेन विधीयत इति सिद्धम् ।

प्रयोजनं पूर्वपक्षे कर्मान्तरस्य सोमयागाङ्गस्य समप्रधानस्य वा रथन्तरमात्रसामकस्य पूर्वयागेन सह ग्रहाग्रतायां विशेषाभावेन तन्त्रानुष्ठानेऽपि रथन्तरमात्रसामकत्वात् स्तोत्राण्यावर्तनीयानि । बृहत्सामकस्य तु ग्रहाग्रतायामपि विशेषसत्वेन सुत्यान्तरस्यैवानुष्ठानम् । सिद्धान्ते नेति स्पष्टम् ।

सूत्रं तु एकस्यैव ज्योतिष्टोमस्य रथन्तरादितत्तदङ्गरूपलिङ्गभेदेन ग्रहाग्रताविधिप्रयोजनार्थमुच्चारणं क्रियते । यतः पूर्वकर्मविशेषगुणवाक्यत्वादेतयोः कर्मान्तरविधायित्वानुपपत्तेः एकत्वं ज्योतिष्टोमाभेद एवात्र प्रतीयत इति व्याख्येयम् ॥

इति प्रथमं रथन्तराधिकरणम् ॥

अथ द्वितीयमवेष्ट्यधिकरणम् (२)

सू-अवेष्टौ यज्ञसंयोगात् क्रतुप्रधानमुच्येत॥२-३-३॥(सि)

(विषयसंशयौ)

राजसूये(१)अवेष्टिनामकानि पञ्च कर्माणि समाम्नातानि(२)आग्नेयमष्टाकपालं निर्वपति हिरण्यं दक्षिणा, ऐन्द्रमेका-

१. दिक्सम्बन्धिनामुन्मादायतृणामवजननहेतुत्वात् अवेष्टिरिति कर्मनामधेयम् । २. तै. सं. १–८–१९.

दशकपालमृषभो दक्षिणा, वैश्वदेवं चरुं पिशङ्गी पष्ठौही दक्षिणा, मैत्रावरुणीमामिक्षां वशा दक्षिणा, बार्हस्पत्यं चरुं शितिपृष्ठो दक्षिणा" इत्येतैर्वाक्यैः । अत्र गुणवाक्ये एकादेष्टिसंज्ञासंयोगेऽपि साकमेधवदुत्पत्तिवाक्ये प्रत्येकदक्षिणाम्नानाद्दक्षिणायाश्च कर्त्रानत्यर्थत्वात् तेन कर्तृत्वभेदप्रतीतेः तद्भेदेन च प्रयोगभेदावगमेः एकैकं कर्म अन्वाधानादिब्राह्मणतर्पणान्ताङ्गविशिष्टं भेदेनानुष्ठेयमित्येकादशे वक्ष्यमाणत्वात् अविवादम् । तदवान्तरप्रकरणे च "यदि ब्राह्मणो यजेत, बार्हस्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वा तमभिघारयेत, यदि राजन्यः ऐन्द्रं, यदि वैश्यो वैश्वदेव" मित्येवं समाम्नातम् । तत्रापि किं पूर्ववदेव ब्राह्मणादिग्रहणं निमित्तार्थमुत विधानार्थमिति संशयः ।

(सङ्गतिः)

ब्राह्मणत्वादेः गुणस्यानिश्चितविधेयताकत्वात् कृतिसाध्यत्वाभावाच्च तत्प्रयोज्यभेदनिरूपणेन पादाध्यायसङ्गतिः स्पष्टा । गुणादीनां विध्यापादनद्वारा भेदकत्वात् कर्त्रादीनां च गुणानां भावनोत्पत्तावनन्वयित्वेन तद्विध्यापादनद्वारा तद्भेदकत्वाभावेऽपि प्रयोगान्वयित्वात् तद्विध्यापादनद्वारा भावनाप्रयोगभेदकत्वनिरूपणाद्ध्यायसङ्गतिः । अनन्तरा त्वापवादिकी ।

(पूर्वपक्षः)

तत्र पूर्ववदेव यदिशब्दसंयोगात् विशिष्टविधिगौरवाभावाच्च ब्राह्मणत्वादि कर्तृनामसम्बन्धेन निमित्तम् । न च क्षत्रियमात्रकर्तृकराजसूयान्तर्गतावेष्टौ ब्राह्मणवैश्ययोः तेन संबन्धेन प्राप्त्यभावात्, क्षत्रियस्य च नित्यप्राप्तत्वेन निमित्तत्वानुपपत्तेः कथं पूर्वाधिकरणन्यायविषयत्वमिति वाच्यम् । राजसूयाधिकारवाक्यस्थराजपदस्य क्षत्रियमात्रवाचित्वाभावेन अस्य तन्मात्रकर्तृक-

त्वासिद्धेः । तथा हि—

आर्यावर्तानार्यावर्त्तसाधारण्येन अविगीतसार्वलौकिकप्रसिध्या राजशब्दो मनुष्यमात्रवृत्त्यन्याप्रेरितप्रजापालनकर्तृत्वे शक्तः चोरादिशब्दा इव परस्वापहरणकर्तृत्वे । अत्र राज(१)पुरुषे राजशब्दप्रयोगाभावात् अन्याप्रेरितेति विशेषणम् ।

न चैवं सखण्डोपाधेः शक्यतावच्छेदकत्वकल्पने गौरवापत्तेः द्रविडानामपालयितर्यपि क्षत्रिये राजशब्दप्रयोगात् जातिवाचित्वमेव लाघवाद्युक्तमिति वाच्यम् । द्रविडानां प्रत्यन्तदेशनिवासित्वेन म्लेच्छदेशस्थत्वात् तत्प्रसिद्धेरार्यावर्तसकलजनप्रसिद्धितो दौर्बल्येन पीलुशब्द इव राजशब्दे शक्तिग्राहकत्वानुपपत्तेः । न हि शक्तिग्राहकप्रमाणगते प्राबल्य एव निर्णायके सति लाघवस्य शक्तिनिर्णायकत्वं शक्यते वक्तुम्, लाघवस्य प्रमाणानुग्राहकत्वेन सन्देह एव निर्णायकत्वात् । अन्यथा अश्ववालशब्दस्य क्लृप्तावयवशक्त्यैव विशिष्टार्थबोधकत्वोपपत्तौ प्राबल्यस्यापि शक्तिग्राहकत्वानुपपत्तेः । अत एव न बर्हिराज्यादिशब्दतुल्यत्वम् । तत्र जातिं विहाय क्वचिद्दृष्टप्रयोगेण लाघवस्य नियामकत्वोपपत्तेः । प्रकृते तु जातिव्यभिचारेण प्रबलप्रमाणप्रमितेनोपाधिव्यभिचारस्य दुर्बलप्रमाणप्रमितस्य बाधात् न तस्य जाति(२)वाचकनिर्णायकत्वोपपत्तिः ।

ननु—स्वरूपेण दुर्बलस्यापि व्याकरणादिस्मृत्युपष्टम्भत्वेन प्राबल्योपपत्तिः; तथाहि—तस्य कर्मेत्यर्थे राजशब्दात् ब्राह्मणादिगणपठितात् (३)ष्यञ्प्रत्ययं पुरोहितादिगणपठिताद्वा यक्प्रत्ययं (४)"पत्यन्तपुरोहितादिभ्यो यक्" इति सूत्रेण स्मरन्ति पा-

१. राजमनुष्ये २. वाचित्व

३. गुणवचनब्राह्मणादिभ्यः कर्मणि च (पा. सू. ५-१-१२४) इति सूत्रविहितमित्यर्थः । ४. पा. सू. ५-१-१२८

णिन्यादयः । ततश्च राज्ञः कर्म राज्यमित्येवं प्रजापालने राजकर्मणि राज्यशब्दव्युत्पत्तेः राजशब्दस्य च ब्राह्मणादिशब्दवत् प्रजापालनकारिवाचित्वाव्युत्पत्तेः सिद्धवन्निर्देशेन जातिवाचितावसीयते । तथा राजन्यशब्दस्य क्षत्रियमात्रवचनत्वेन निस्सन्दिग्धस्य "(१)राजश्वशुराद्यत्" इति सूत्रेण तस्यापत्यमित्यस्मिन्नर्थे यत्प्रत्ययविधानेन राजशब्दप्रकृतिकत्वान्वाख्यानादपि क्षत्रियापत्यं क्षत्रिय इतिवत् राजशब्दस्यापि जातिवाचित्वमवसीयते ।

तथा मन्वादयोऽपि क्षत्रियस्यैव प्रजापालनं परमो धर्मः, (२)"राजा सर्वस्येष्टे ब्राह्मणवर्ज" मित्याद्युपदिशन्तः राजपुरस्कारेण प्रजापालनविधानात् राजशब्दस्य पूर्वप्रसिद्ध्यपेक्षायां क्षत्रियमात्रपुरस्कारेण तद्विधानाद्राजशब्दस्य क्षत्रियमात्रवाचितामनुमन्यन्ते । अतः स्मृत्युपष्टब्धस्य दुर्बलस्यापि प्रमाणस्य शक्तिग्राहकत्वोपपत्तिरिति चेत्—

न; प्रबलस्यापि प्रमाणस्य (३)"न राज्ञः प्रतिगृह्णीयात्(४)न राजन्यप्रसूतितः (५)"न शूद्रराज्ये निवसेदि" त्यादिस्मृत्युपष्टब्धत्वाविशेषेण शक्तिग्राहकत्वोपपत्तेः ।

किञ्च न व्याकरणादिस्मृतिः शक्तिग्रहे प्रमाणम्, साधुत्वादिकथनमात्रपरत्वात् । अथापि प्रमाणं स्यात् तथापि न तया पालनकारिवाचित्वं व्यावर्तितम् । तत्सत्त्वेऽपि राज्यशब्दस्य

---

१. पा. सू. ४-१-१३७ २. गौ. ध. ११-१. ३. म. स्मृ. ४-८४.
४. अराजन्यप्रसूतितः इतीदानीं मुद्रितेषु मनुस्मृतिपुस्तकेषूपलभ्यते पाठो न्यायसुधायां प्रभावल्यां च । परन्तु कौस्तुभे सर्वत्राप्यादर्शपुस्तकेषु "न राजन्यप्रसूतितः" इत्येवोपलभ्यत इति स एव निवेशितः । ५. म. स्मृ. ४-६१.

तत्कर्मवाचित्वोपपत्तेः । नचैतावता राजशब्दव्युत्पत्तिग्रहसापेक्षत्वम् । राजशब्दव्युत्पत्तिग्रहस्य तदभावेऽपि पालनत्वेन बुद्धस्यैव तस्य कर्तृतावच्छेदकत्वोपपत्तेः । राज्यशब्द एव परमवयवार्थप्रत्यभिज्ञानात् चौर्यशब्दवत् पालनत्वावच्छिन्नपालनकारिकर्मणि यौगिको रूढो वा, नत्वेतावतेतरेतराश्रयत्वम् । राजन्यशब्दान्वाख्याने तु कात्यायनेनैव राज्ञोऽपत्ये जातिग्रहणमिति परिसंख्यानात् राजन्यशब्दस्य सामान्यतः पालनकार्यपत्यवाचित्वेन प्रसक्तस्य पङ्कजादिशब्दवत् क्षत्रियत्वसमानाधिकरणस्यैव तस्य वाच्यत्वनियमकरणेन शुद्धराजपदस्य पालनकारिवाचित्वाभ्यनुज्ञानात् विपरीतसाधनत्वम् ।

न च जातिपदस्य मनुष्यत्वादिजातिमात्रेणाप्युपपत्तेः क्षत्रियत्वग्रहण एव प्रमाणाभावः । विधानसामर्थ्यादेव मनुष्यत्वप्राप्तेः मनुष्यत्वग्रहणासम्भवेन राजन्यशब्दस्य क्षत्रियमात्रप्रयोगेण च क्षत्रियत्वग्रहणोपपत्तेः । मन्वादिस्मृतेस्तु क्षत्रियमात्रोद्देशेन पालनावश्यकताविधायकत्वेऽपि रागादिना ब्राह्मणादावपि पालयितृत्वसम्भवात् नोपष्टम्भकता । न हि विहितपालनकारित्वं राजपदशक्यतावच्छेदकं, गौरवापत्तेः; प्रमाणाभावाच्च ।

किञ्च आर्यावर्तप्रयोग एव परं "यदि ब्राह्मणो यजेत" इत्यादिवाक्यत्रयस्थयादिशब्देन निमित्तत्ववाचिना पाक्षिकप्राप्तिमपेक्षमाणेन क्षत्रियमात्रवचनत्वे तदनुपपत्तेः राजशब्दस्य पालयितृवाचित्वमाक्षिपता उपष्टब्धः । अतो राजशब्दस्य क्षत्रियमात्रवचनत्वाभावात् अपालयितृव्यावृत्तिमात्रफलकस्य पालयित्रधिकारमात्रपरत्वावगतेः आहिताग्नित्वादिरूपाधिकारिविशेषणेन शूद्रादिव्यावृत्तावपि ब्राह्मणादिव्यावृत्तौ प्रमाणाभावात् राजसूयस्य पालयितृत्रैवर्णिकाधिकारिकत्वावगतेः तदन्तर्गतायामपि अवेष्टौ

ब्राह्मणादेः प्राप्तत्वात् निमित्तत्वोपपत्तिः । तन्नैमित्तिकश्च बार्हस्पत्यादिमध्यनिधानपूर्वकप्रत्याहुत्यभिघारणविशिष्टः प्रयोगः, न त्वभिघारणमात्रं, मध्यनिधानविशिष्टाभिघारणस्य पञ्चहविष्कैकेष्टिप्रयोग विना(१)नुपपद्यमानस्य एकैकहविष्केष्टिप्रयोगेष्वनिवेशात् ।

अत एवाभिघारणस्य कर्मोत्पत्त्यन्वयिनोऽपि न कर्मान्तराक्षेपकत्वम् । तथात्वे तस्य कर्मान्तरस्य दर्शपूर्णमासप्रकृतिकत्वापत्त्या प्रकृतहविर्मध्यनिधानरूपविशेषणानुपपत्तेः । अतो मध्यनिधानरूपविशेषणसामर्थ्यात् अभिघारणस्याप्यवेष्टिप्रयोगान्तराक्षेपकत्वमेव ।

नचैवं पूर्वपक्षसिद्धान्तयोरुभयोरपि प्रयोगान्तरत्वे भेदाभेदचिन्ताभावाल्लक्षणासङ्गतिः । ब्राह्मणादिरूपगुणस्य वाक्यभेदापादनविधया भेदकत्वविचारेण सङ्गत्युपपत्तेः । तत्प्रयोजनञ्च राजसूयात् बहिरपि ब्राह्मणादिकर्तृकावेष्टिमात्रप्रयोगसिद्धिः । ब्राह्मणादिश्रवणस्य निमित्तार्थत्वे हि राजसूयान्तर्गतोऽपि नैमित्तिकपञ्चहविष्कैकेष्टिप्रयोगस्स्यात्, प्रापकत्वपक्षे तु बहिरेवेत्यस्ति प्रयोजनम् । अत एव पञ्चेष्टिप्रयोगा अपि (२)बार्हद्गिरादिवदनुलोमादिविषयत्वेन व्यवस्थापनीयाः ।

अत एव राजसूयान्तर्गतप्रयोगाणां राजसूयाधिकारविधिना स्वाराज्यफलकत्वावगमेऽपि "एतयान्नाद्यकामं याजये" दित्यधिकारान्तरविधिना नित्यनैमित्तिकानां अवेष्टिमात्रप्रयोगाणां अ-

---

१ अनुपपत्तेः तस्य ।

२ "बार्हद्गिरं ब्राह्मणस्य ब्रह्मसाम कुर्यात्, पार्थुरश्मं राजन्यस्य, रायोवाजीयं वैश्यस्य" इति द्वादशाहे श्रु(त्या)नां बार्हद्गिरादीनां सत्रात्मके द्वादशाहे ब्राह्मणतरस्य प्राप्त्यभावात् यथा अहीनविषयतया व्यवस्था क्रियते, तद्वत् प्रत्येकप्रयोगा पञ्चानुलोमविषयतया व्यवस्थापनीया इत्यर्थः ।

न्नाद्यरूपफलसम्बन्धस्याप्यवगमात् युगपत्प्रयोगे च योगसिद्ध्यधिकरणन्यायेन अनेकफलजननायोगात् राजसूयाद्बहिरपि तत्तत्प्रयोगाणामन्नाद्यार्थमनुष्ठानं वेदितव्यम् । न त्वेतावता अन्नाद्यवाक्येऽपि प्रयोगान्तरविधिः । तस्य लाघवेन फलसम्बन्धमात्रपरत्वोपपत्तौ प्रयोगान्तरविधायित्वे प्रमाणाभावात् । अत एव तस्यैव प्रयोगस्य बहिर्व्यक्तिभेदमात्रं, न तु वैजात्यम् । तस्मात् ब्राह्मणत्वादिनिमित्ते स्वाराज्यार्थं अन्नाद्यार्थं वा मध्येनिधानपूर्वकाभिघारणविशिष्टावेष्टिप्रयोग एव तत्तद्वाक्ये विधीयत इति सिद्धं ब्राह्मणश्रवणस्य निमित्तार्थत्वात् अभेदकत्वमिति प्राप्ते —

(अथ सिद्धान्तः)

अभिधीयते—नैतानि निमित्तार्थानि, अप्राप्तत्वात् ब्राह्मणादीनां राजसूये । तथा हि—न राजशब्दः प्रजापालनक्रियाकर्तृवाची द्रविडानामपालयत्स्वपि क्षत्रिये राजशब्दप्रयोगेण पालनस्य बहिराज्यशब्देषु संस्कारस्येव व्यभिचारात् । न चार्यावर्तसकलजनानां पालयितरि ब्राह्मणादावपि प्रयोगेण बलीयसा जातेरपि व्यभिचारावगमात् पालनकारित्वाचित्वनिश्चयः । बलीयसोऽपि बलवत्प्रमाणानुगृहीतेन द्रविडप्रयोगेण बाधात् । तथा हि—

अस्तु तावत् स्मृतेरनुग्राहकत्वम् , श्रुतिरेव सकलप्रमाणमूर्धन्यानुग्राहिका समस्ति । अभिषेको हि पालनाधिकारसंपत्तये क्षत्रियपुरस्कारेण समाम्नातः । तद्विधौ च 'राजानमभिषेचयेत्' इत्यत्र राजोद्देशेनाभिषेको विधीयते । उद्देश्यस्य च पूर्वप्रसिद्धिसापेक्षत्वात् न पालनकर्तृत्ववाचित्वे सा सम्भवति । न ह्यभिषेकात् पूर्वं पालयितृत्वमस्ति । अभिषेकस्य पालनाधिकारसम्पादकत्वेनैव विधेयत्वात् ।

न चाभिषेकात् पूर्वं पालयितृत्वासम्भवेऽपि तद्योग्यत्वमादायैव राजशब्दप्रसिद्ध्युपपत्तिः । तत् किं योग्यत्वमात्रे तत्रस्थराजशब्दस्य लक्षणा ? शक्तिर्वा ? नाद्यः ; मनुष्यमात्रस्य प्रजापालनयोग्यत्वेन पालनयोग्यत्वस्य पालनाधिकारसम्पादकाभिषेकविधिसामर्थ्यलभ्यत्वेन च राजपदवैयर्थ्यापत्तेः ।

अत एव न द्वितीयोऽपि । राजसूयाधिकारवाक्यस्थराजपदस्यापि व्यावर्त्याभावेनास्मिन् पक्षे वैयर्थ्यापत्तेः ।

न च क्रौर्यशौर्यातिशयवत्त्वस्य पालनयोग्यतावच्छेदकत्वाङ्गीकारात् तद्रहितव्यावृत्त्यापि राजपदसार्थक्योपपत्तिरिति वाच्यम् । क्रौर्यशौर्याद्यतिशयवति पालनयोग्ये ब्राह्मणादौ राजपदप्रयोगाभावेन तादृशयोग्यतावच्छेदकावच्छिन्ने राजपदशक्त्यङ्गीकारे शक्तिग्राहकप्रमाणाभावात् । अतो योग्यतामादाय पालनमादाय वा राजपदस्याभिषेकविधिस्थस्य पूर्वप्रसिद्ध्यनुपपत्तेः द्रविडप्रयोगोन्नीतं क्षत्रियवाचित्वमेवाभिषेकविधिरनुमन्यते ।

एतेन पूर्वप्रसिद्ध्यभावेऽपि "यूपं छिनत्ती"तिवत् अभिषेकजन्यादृष्टत्वस्यैव राजपदशक्यतावच्छेदकस्य तद्विधिप्रवृत्त्युत्तरकालं तद्बलेनैव बोधोपपत्तेः न द्रविडप्रयोगोन्नीतक्षत्रियवाचित्वसम्भव इत्यपास्तम् । "व्रीहीनवहन्ती" त्यादिवत् कथञ्चिदपि पूर्वप्रसिद्धिसम्भवे अभिषेकपरस्य विधेः गुरुभूतशक्यतावच्छेदकत्वविषयशक्तिग्राहकत्वकल्पने गौरवापत्तेः । अभिषेकस्य ब्राह्मणादावविहितत्वेन कृतेऽपि अभिषेके तज्जन्यादृष्टवत्त्वे प्रमाणाभावात् । ब्राह्मणादेः राजसूयाधिकाराभावप्रसङ्गेन भवादिष्टसिद्ध्यभावाच्च । अत एव न "राजेत्येतानभिषिक्तानाचक्षते" इत्यादिलिङ्गान्यपि अभिषेकजन्यादृष्टवत्त्वे राजपदस्य शक्तिरित्येवंपराणि । शक्यतावच्छेदके गौरवात् । अपि तु निरूढलक्षणापराणि । तत्प-

योजनञ्च राजसूये प्रजापालनादिविशेषौ अभिषिक्तक्षत्रियपरत्व-सिद्धिः ।

अत एव अभिषिक्तक्षत्रियलक्षकराजप्रातिपदिकघटितराजन्य-पदस्यापि तल्लक्षकत्वप्रसक्तौ परिसंख्यानार्थं 'राज्ञोऽपत्ये जातिग्रह-णम्' इति वार्त्तिकम् । तेन राजन्यपदस्य नाभिषिक्ते निरूढलक्षणे-त्यपि सिध्यति । अतः श्रुत्युपष्टम्भकप्रसिद्धप्रयोगेणैव लाघवतर्कोपष्ट-म्भेन क्षत्रियवाचित्वसिद्धिः ।

आर्यावर्त्तप्रयोगस्तु राजकार्यपालनकारित्वात् गौणः । एवञ्च व्याकरणादिरपि न चौर्यादिशब्दवत् पालनकारिकर्मणि राज्य-शब्दः साधुरित्येवंपरत्वेन व्याख्येयः, अपि तु क्षत्रियकर्मणीत्येवं-परत्वेनैवेति द्रष्टव्यम् । यदिशब्दस्तु निपातत्वात् पूर्वाधिकरणो-क्तरीत्या लिङः हेतुमद्भावादिपरत्वतात्पर्यग्राहकतयापि व्याख्या-यमानो न दुष्यति इति ब्राह्मणादीनां राजसूये प्राप्त्यभावात् नि-मित्तार्थत्वानुपपत्तेः युक्तैव विधेयब्राह्मणादिरूपगुणवशात् प्रयोग-भेदसिद्धिः । यथैव हि मध्येनिधानविशिष्टाभिघारणस्य पूर्वप्रयोगेषु पूर्वपक्षयुक्तरीत्याऽनिविशमानत्वात् प्रयोगभेदकत्वं, तथैव ब्राह्मण-त्वादेः निर्ज्ञातक्षत्रियमात्रकर्तृकावेष्टिप्रयोगेष्वनिवेशात् वाक्यभेदा-पादकत्वाच्च प्रयोगभेदकत्वं युक्तमेव । अतो ब्राह्मणादिसकलविशेष-णविशिष्ट एकप्रयोगो विधीयते ।

वार्त्तिककारीयकर्मान्तरविधिपक्षस्तु वाजिनादिवदुत्पत्त्यन्वयि-गुणाभावात् प्रौढिवादमात्रम् । योऽप्यभिघारलक्षणो गुणः सोऽपि मध्येनिधानरूपविशेषणसामर्थ्यात् प्रयोगाक्षेपक एव । कर्मान्तर-विधित्वे हि तस्य दर्शपूर्णमासविकारत्वापत्तेः कथञ्चिद्वा प्रकृतहवि-र्विकारत्वेऽपि एकविकारत्वापत्तेः अन्यहविःप्राप्त्यभावेन मध्ये निधानानुपपत्तिः । अतः प्रयोगान्तरमेव विधीयते । तस्य च धर्मि-

ग्राहकप्रमाणेनैव राजसूयबहिर्भावसिद्धिः ।

अत एव ब्राह्मणादिश्रवणानवच्छिन्ना अवेष्टिप्रयोगा एव राजसूयमहाप्रयोगान्तर्गता इति वेदितव्यम् । अत एव च बहिरनुष्ठीयमानपञ्चहविष्कैकेष्टिप्रयोगस्य फलापेक्षायां अपेक्षितविधानन्यायेन "एतया अन्नाद्यकामं याजये" दित्यनेन फलसम्बन्धः क्रियते इत्येकैकहविःप्रयोगेभ्यो नान्नाद्योत्पत्तिः, अपि तु राजसूयमहाप्रयोगान्तर्गतेभ्यः तेभ्यः स्वाराज्योत्पत्तिरेव । अत एवं प्रकृतपरामर्शैतच्छब्दनिर्दिष्टावेष्टिमात्रपुरस्कारेणान्नाद्याम्नानात् निरवकाशान्नाद्यावरुद्धावेष्टिर्निराकाङ्क्षत्वात् न तद्व्यतिरिक्तविषयेऽपि सावकाशं स्वाराज्यं गृह्णातीत्यपास्तम् । अन्नाद्यस्यापि ब्राह्मणादिकर्तृकप्रयोगे सावकाशत्वात् । अतश्च राजसूयप्रकरणपाठसार्थक्यार्थं एकैकहविष्केष्टिप्रयोगाः स्वाराज्यफलका एव । न च विनिगमनाविरहः, ब्राह्मणादिसम्बन्धस्यैव स्वाराज्यप्रयोगे असम्बध्यमानस्य नियामकत्वात् ।

किञ्च यद्यप्यत्र प्रयोगभेदो न स्यात् तथापि निरवकाशेनापि फलेनावरुद्धा अवेष्टिः सावकाशेनापि फलेन गृह्यत एव । न च वाजिनो(१)पांशुत्वादिन्यायः । तत्र हि वाजिनोपांशुत्वादेः गुणभूतत्वादामिक्षायागदीक्षणीयादावुत्पत्तिशिष्टनिरवकाशगुणावरुद्धे आकाङ्क्षोत्थापनासम्भवात् युक्तो बाधः, प्रकृते तु सावकाशस्यापि प्रधानत्वात् फलस्याकाङ्क्षोत्थापकत्वोपपत्तेः न बाधो युक्तः । अत एव उत्पत्तिशिष्टनिरवकाशपशुरूपफलावरुद्धस्यापि

१ उपांशुत्वन्याय इति । "तस्मात् यत्किञ्चित् प्राचीनमग्नीषोमीयात् तेनोपांशु चरन्ति" इति वाक्यविहितस्योपांशुस्वरस्य यज्ञभागसम्बन्धिनः यथा "यावत्या वाचा कामयेत तावत्या दीक्षणीयायामनुब्रूयात्" इति दीक्षणीयामात्रोद्देशेन विशेषविहितेन कामस्वरेण बाधः तथैवात्रापि बाधो भवत्विति ।

द्भिदादेः(१)विविदिषाफलेन आकाङ्क्षोत्थापनम् ।

नचैवं श्रुत्या गार्हपत्याङ्गत्वेन प्रमितस्यापि मन्त्रस्य आकाङ्क्षात्थोपनेन लिङ्गादिन्द्राङ्गत्वापत्तिः, लिङ्गोन्नीतश्रुतेः कल्प्यत्वेन तत्र स्वारसिकाकाङ्क्षाया एव कारणत्वात् । अस्तु वा निरवकाशेनापि शेषिणा सावकाशस्यापि शेषिणो बाधः, तथापि पूर्वोक्तविधया अन्नाद्यस्यापि सावकाशत्वात् स्वाराज्यतुल्यत्वम् । अत एव(२)"ईश्वरो वा एष दिशोनून्मदितोः । यं दिशोऽनुव्यास्थापयन्ति । दिशामवेष्टयो भवन्ति ।" इति राजसूयान्तर्गततया विहितदिग्व्यवस्थापननिमित्तोन्मादपरिहारसाधनत्वेन अवेष्टीनां स्तुतिरपि राजसूयप्रयोगान्तःपातादुपपद्यते ।

एतेन एकैकहविष्कोष्टिपञ्चकस्य राजसूयप्रयोगान्तःपातेऽपि द्विविधस्यापि प्रयोगस्य अन्नाद्यफलकत्वमेव, एतच्छब्देन परामर्शाविशेषात् इत्यप्यपास्तम् । सन्निधानाविशेषेऽपि आकाङ्क्षितसम्बन्धस्य न्याय्यत्वेन ब्राह्मणादिकर्तृकप्रयोगस्यैवान्नाद्यफलकत्वौचित्यात् । तेन सिद्धं राजसूयात् बहिरनुष्ठेयानि प्रयोगान्तराण्येवान्नाद्यफलकानि विधीयन्ते ब्राह्मणादिवाक्यैरिति ।

न च ब्राह्मणवैश्यवाक्ययोस्तद्विधानेऽपि राजन्यवाक्ये राजन्यस्य राजसूये प्राप्तत्वेनाविधेयत्वात् नित्यप्राप्तत्वेन च निमित्तत्वायोगेऽपि यदिशब्दस्य ब्राह्मणवैश्यवाक्ययोरिव परित्यागादिना राजन्यस्यानुवादमात्रत्वोपपत्तेः मध्येनिधानस्य पञ्चेष्टिप्रयोगेष्वनिवेशेन प्रयोगान्तरविधायकत्वेऽपि तस्य स्वाराज्यफलार्थं राजसूयप्रयोगान्तःपातेनैव विकल्पेन समुच्चयेन वा करणोपपत्तेः न

१ "विविदिषन्ति यज्ञेन दानेन तपसानाशकेन" इति वाक्येन सर्वकर्मणां तत्तत्फले विनियुक्तानामपि विविदिषार्थत्वेनापि विनियोगात् तत्सम्बन्धार्थं आकांक्षोत्थाप्यत इत्यर्थः ।

२ तै. ब्रा. १-८-३ १.

प्रयोगबहिर्भावोपपत्तिरिति वाच्यम् । राजन्यपदस्य अनुवाद-मात्रत्वे वैयर्थ्यापत्तेः तस्य चाभिषिक्तानभिषिक्तसाधारणक्षत्रिय-मात्रवाचित्वेनानभिषिक्तक्षत्रियस्य राजसूये अप्राप्तस्यानुवादायो-गात् राजन्यपदस्य क्षत्रियविधायित्वावगतेः ब्राह्मणादिवाक्य-न्यायेनाभिषिक्तानभिषिक्तक्षत्रियसाधारण्येन राजसूयप्रयोगबहिर्भू-तप्रयोगान्तरविधायित्वस्यैवावसायात् । अतःसिद्धं ब्राह्मणादि-गुणस्य भेदकत्वम् ।

नचैतेषु प्रयोगेषु दक्षिणाभावः, औत्पत्तिकदक्षिणया एकै-कहविष्कप्रयोग एवावरुद्धत्वादिति वाच्यम् । तस्याः प्रयोगा-क्षेपकत्वेऽपि साङ्गप्रधानाङ्गत्वेनेहापि निरूढपश्वादौ महावेदिवत् प्राप्त्युपपत्तेः । अनयैव दिशा पूर्वपक्षेऽपि नैमित्तिकप्रयोगे दक्षि-णाप्राप्तिरुपपादनीया । प्रयोजनं प्रसङ्गात् पूर्वमेवोक्तम् ।

सूत्रं तु अवेष्ट्यनन्तरप्रकरणस्थेषु ब्राह्मणादिरूपगुणश्रवणं क्रतुप्रधानमवेष्टिप्रयोगभेदनियामकं राजसूययज्ञे क्षत्रियस्यैव संयोगेन ब्राह्मणादीनामप्राप्तानां विधेयत्वादिति व्याख्येयम् ॥

इति द्वितीयमवेष्ट्यधिकरणम् ।

अथ तृतीयमाधानाधिकरणम् (३)

सू—आधानेऽसर्वशेषत्वात् ॥ २—३—४. ॥ (सि)

(विषयसंशयौ)

अनारभ्य श्रुतं(१)"वसन्ते ब्राह्मणोऽग्नीनादधीत" "ग्रीष्मे

१ तै. ब्रा. १-१-२-६.

राजन्यः" "शरदि वैश्यः" इति। तथा "वसन्ते ब्राह्मण-मुपनयीत" "ग्रीष्मे राजन्यं" "शरदि वैश्य" मित्यादि ।

तत्र पूर्ववदेव ब्राह्मणादिश्रवणानि कालविधौ, ब्राह्मणादिविधौ वा कालश्रवणानि निमित्तार्थानि उत स्वस्ववाक्ये आधानविधिबोधनद्वारा तद्भेदबोधकानीति संशयः ।

(सङ्गतिः)

पादाध्यायसङ्गती पूर्ववत् । अनन्तरा तु पूर्वत्र राजसूयस्य क्षत्रियमात्रकर्तृकत्वात् ब्राह्मणादीनां कथमप्यप्राप्तेर्युक्ता विधेयत्वेन भेदकता । प्रकृते तु आधानस्योपनयनस्य वा आक्षेपादेव सर्वकालकर्तृकत्वोपपत्तेः प्राप्तानां ब्राह्मणादीनां निमित्तत्वोपपत्तिरिति पूर्वपक्षोत्थानात् द्रष्टव्या ।

(पूर्वपक्षः)

तत्र नित्यकाम्यसाधारण्येन सर्वेषां क्रतूनां अग्निविद्यासापेक्षत्वात् अग्निविद्ययोश्च स्वजनकीभूताधानाध्ययनापेक्षत्वात् अध्ययनस्य चोपनयनसाध्यत्वात् क्रतुविधीनां आधानोपनयनाक्षेपकत्वमवगम्यते । न चाधानोपनयनयोः परम्परया क्रतुजनकत्वेऽपि अङ्गताग्राहकप्रमाणभावेन क्रत्वनङ्गत्वात् क्रतुप्रयोगविधिविषयत्वाभावेन कथं तत्प्रयुक्तत्वमिति वाच्यम् । अनङ्गस्यापि अभिक्रमणादिवदन्यथानुपपत्तिमात्रेण प्रधानविधिप्रयुक्तत्वोपपत्तेः।

अथ तत्र प्रयाजविधिरेव प्रयोजक इत्युच्यते ततोऽत्रापि अग्निरध्ययनं चाङ्गत्वाभावेऽपि जनकत्वादाधानोपनयनयोः प्रयोजकमित्यपि शक्यं वक्तुम् । आधानस्य वक्ष्यमाणरीत्या(१)विहितत्वस्यापि सत्वेन अग्न्यङ्गत्वोपपत्तेश्च । अतश्च क्रतुविधिप्रयुक्त-

१ विहितत्वेऽपि तत्वेन

योराधानोपनयनयोः तत्कर्तृकत्वेन निर्ज्ञातत्वात् क्रतूनां च स्वर्गकामत्वाविशेषेण ब्राह्मणादिकर्तृकत्वात् तदाक्षिप्ताधानोपनयनयोरपि ब्राह्मणादिकर्तृकत्वप्राप्तेः ब्राह्मणश्रवणस्य निमित्तार्थत्वोपपत्तिः ।

नचात्र यदिशब्दाभावात् निमित्तत्वानुपपत्तिः । यदिशब्दस्यापि प्राप्तिद्योतकमात्रत्वेन प्रकृते तदभावेऽपि प्राप्तिमात्रेण निमित्तत्वोपपत्तेः, तन्नैमित्तिकश्च वसन्तादिकालाधिकरणतानियमः । अत एव कालस्य सन्ध्यावन्दनादिवन्निमित्ताधीनानुष्ठानविषयत्वरूपनैमित्तिकत्वासम्भवेऽपि निमित्तान्वयव्यतिरेकानुविधाय्यधिकरणताकत्वमेव तदिति द्रष्टव्यम् ।

आधानोपनयनयोश्च वक्ष्यमाणरीत्या वाक्यान्तरादर्थाच्च प्राप्तयोरीप्सितत्वाख्योद्देश्यत्वेऽपि विजातीयानेकोद्देश्यत्वात् न वाक्यभेदः । कालस्य चानुपादेयत्वेनोद्देश्यत्वेऽपि विधेयत्वादपि न सः । अतश्च कर्तृतासम्बन्धेन ब्राह्मणत्वादौ निमित्ते आधानाद्युद्देशेन वसन्तादिकालो विधीयते । तेन ब्राह्मणादेः कालान्तरनिवृत्तिः, ब्राह्मणाद्यतिरिक्तस्य च शूद्रादेरनियतकालकत्वं सिद्धं भवति ।

अथ वा क्रतुविधिभिः सर्वसाधारण्येन आधानोपनयनाक्षेपवत् सर्वकालसाधारण्येनापि स क्रियते । न हि क्रतुविधिभिराक्षेपपक्षेऽपि प्रयाजादिवत् प्रयोगान्तःपाती स इति युज्यते । अग्नीनामन्ते प्रतिपत्तिविधानेन तत्साधनस्याधानस्य (१)पात्रवत्

---

१ "आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्च" इत्यनेन पात्राग्न्योः दाहं प्रति गुणत्वावगमेऽपि "दक्षिणहस्ते जुहूमासादयति, सव्यहस्ते ध्रुवाम्" इत्यादिना द्वितीयानिर्देशात् प्रतिपत्तिसंस्कार्यत्वावगतेः तदर्थं दर्शपूर्णमासारम्भकाले सम्पादितानामेव पात्राणां यावज्जीवं

साधारणत्वापत्त्या प्रयोगात् बहिरेवानियतकाल(१)कर्तव्यत्वप्राप्तेः। उपनयनस्य त्वध्ययनार्थत्वेन सामर्थ्यादेव प्रयोगबहिर्भावः। अतश्चाग्निहोत्रादिप्रयोगपूर्वभावितया अनियतकाले प्रसक्तयोराधानोपनयनयोः वसन्तादिकालकत्वे निमित्ते ब्राह्मणादिकर्तृकत्वं विधीयते। एवञ्च "यद्वृत्तयोगः प्राथम्यमित्याद्युद्देश्यलक्षणम्" इत्यादिन्यायात् वसन्तादिकालस्य निमित्तता प्राथम्यादुपपन्ना भवति। तत्फलं च वसन्ताद्यतिरिक्तहेमन्तादिकालकस्याधानस्योपनयनस्य वा ब्राह्मणाद्यनियतकर्तृकत्वासिद्धिः। सर्वथा नोभयविशिष्टाधानोपनयनविधिः, गौरवात्, अन्यतः सम्भवत्प्राप्तिकत्वाच्च।

ननु–उपनयनस्य सामर्थ्यादध्ययनजनकत्वेऽपि नियमेनानाक्षेपाद्विधिविषयत्वोपपत्तिः, आधानस्य तु अदृष्टरूपाहवनीयादिजनकत्वं न विधिं विना पक्षेऽप्यवगतमिति कथं न तद्विषयत्वं? किञ्चाधानविध्यभावे आहवनीयादिपदार्थ एवानवगतः, न ह्यसौ लोकप्रसिद्धः (२)यूपादिवत्। आधानजन्यादृष्टविशेषस्तु विधिं विना असिद्ध एव। ततश्चाहवनीयादिपदार्थस्यैवाप्रसिद्धौ आधानजन्यत्वस्य सुतरामप्रसिद्धेः कथं कामश्रुतिभिः तदाक्षेप इति चेत्–

न; पक्षप्राप्त एवोपनयने गुणसङ्क्रान्तशक्तिना विधिना नैमित्तिकविधानोपपत्तेः। आधानप्राप्तौ तु यतन्ते—

धारणात् यथा सर्वकर्मसाधारण्यं तेषां, तद्वत् अग्नीनामपि "दक्षिणहस्ते आहवनीयम्" इत्यादिना प्रतिपत्तिविधानात् तत्साधनस्याप्याधानस्य सर्वकर्मसाधारण्यापत्तेरित्यर्थः। पात्राणां सर्वकर्मसाधारण्यं च एकादशे 'यज्ञायुधानि धार्येर'(११-२-१३.) न्नित्यत्र निरूपितम्।

१ कर्तृत्व २ यूपो यथा न लोकप्रसिद्धस्तद्वदित्यर्थः।

तत्र पार्थसारथिस्तावत्–(१) "नक्तं गार्हपत्यमादधाति । दिवाहवनीयम्" इत्यादिवाक्येषु आधानानुवादेन नक्तादिरूपगुणविधायकेषु आहवनीयादिजनकत्वेन आधानानुवादात् तत्प्राप्तिः । इष्यते चानुवादतोऽपि पदार्थप्राप्तिः । "न गिरागिरेति ब्रूया" दिति निषेधानुवादबलेन इरापदस्य गिरापदकार्यकारित्वप्राप्तेरङ्गीकारात् । अवश्यं च वसन्तादिवाक्येषु आधानविधिवादेनापि तत्राहवनीयादिपदाश्रवणात् तज्जनकत्वमाधानस्याग्निपदस्य वा तत्पर्यायत्वं नक्तादिवाक्येषु अनुवादत एवागन्तव्यम् । अतश्च ममापि तत एव प्राप्त्युपपत्तेः निमित्तार्थं श्रवणमिति ।

तन्न ; अनुवादतो विशेष्यप्राप्त्यङ्गीकारे विशिष्टविधिमात्रोच्छेदापत्तेः । इरापदस्थले तु विकारार्थतद्धितेनानियतानेकपदविकारत्वापत्त्या अनियतानेककार्यकारित्वप्रसक्तौ अनुवादबलेन नियममात्रम्, नत्वपूर्वावगतिरिति वैषम्यम् । सिद्धान्तेऽपि च पदान्तरसामानाधिकरण्यादिवत् अनुवादोऽप्युत्पत्तिवाक्यगताग्निपदस्य आहवनीयादितात्पर्यग्राहकतया न विरुध्यते ।

भवदेवस्तु "आहितोऽग्निराहवनीय" इत्याद्यर्थवादवशात् आहवनीयादेराधानजन्यत्वावगतिरित्याह । तदपि वक्ष्यमाणरीत्या प्रत्यक्षविधिसद्भावे अर्थवादोन्नीतविधिकल्पनस्यान्याय्यत्वादुपेक्षणीयम् ।

अत एवं परिहर्तव्यम्–यद्यपि विशिष्टविधिगौरवभिया नान्यो विधिः आधानप्रापकतया सम्भवी । तथापि टुप्टीकोक्तरीत्या "सम्भारेष्वग्निमादधाती" त्ययं अनन्याक्षिप्तशक्तित्वात् आधानविधा-

१ तै० ब्रा० १-१-४-३.

यकः सम्भवत्येव । नह्यत्र सम्भारविधिः, तेषां (१)वार्क्षपार्थिवानां वाक्यान्तरप्रमितत्वात् । नापि तेषामाधानाधिकरणताविधिः । तस्या अपि सामर्थ्यात् (२) "तस्मिन्नाधीयतामय" मित्यादिमन्त्रवर्णाच्च प्राप्तत्वात् ।

एतेनाधिकरणताविशिष्टाधानविधिरिति न्यायसुधाकृदुक्तप्रकारोऽपि प्रतिबन्द्यापत्तेः प्रत्युक्तः । तदा हि नक्तादिवाक्यमादाय प्रतिबन्दी स्फुटैव । अतोऽत्राधानमात्रं विधीयते । तस्य च प्रयोगः प्रयाजादिवत् प्रधानविधिभिरेव । प्रयोगस्यापि ह्यन्यतस्सम्भवत्प्राप्तिकस्य विधाने गौरवात्, प्रयोगविधिचिह्नस्य कालकर्त्रादेरभावाच्च । अतश्च "व्रीहीन् प्रोक्षती" त्यादिवदुत्पत्तिविनियोगश्चानेन क्रियते । अत्रत्याग्निपदं च गुणवाक्यानुसारात् "आहितोऽग्निराहवनीय" इत्याद्यर्थवादवशाच्चोन्नीताहिताग्निपर्यायाहवनीयादिपरम् । अतोऽनन्याक्षिप्तविधिशक्तिकसम्भारवाक्येनैवाधानस्योत्पन्नस्य विनियुक्तस्य च क्रतुविधिभिः सर्वसाधारण्येन प्रयोगविधानात् ब्राह्मणादिश्रवणं निमित्तार्थमेव ।

नचैवं सम्भारवाक्ये परस्मैपदनिर्देशात् अनाधातारं प्रति आहवनीयत्वाभावानवगतेः अन्येनाहितानामपि क्रयणेनान्यस्या-

(१) "सप्त पार्थिवान् सम्भारानाहरति" (आप. श्रौ. ५-१-५.) इति विहिताः सप्त पार्थिवास्सम्भाराः । ते च सिकता, षा, खुकरीष, वल्मीकमृत्, सूद, वराहविहत, शर्करा, रूपाः । ऊषाः ऊषरमृत् । अखुकरीषं मूषिकोद्धृता मृत् । सूदः अशोष्यस्य जलाशयस्य मृत् । शर्कराः क्षुद्रपाषाणाः, कङ्कड् इति भाषायाम् । अन्यत् प्रसिद्धम् । एवं अश्वत्थो, दुम्बर, पलाश, शमी, विकङ्कता, शनिहतवृक्ष, पद्मपत्ररूपाः सप्त वार्क्षाः । वार्क्षाः वृक्षसम्बन्धिनः ।

२ यत् पृथिव्या अनामृतꣳसम्बभूव त्वे सचा । तमग्निरग्नयेऽददात् तस्मिन्नाधीयतामयम्" इति समग्रो मन्त्रः ।

हवनीयसम्भवेन तद्व्याप्तिफलकस्याधातृमात्रसम्बन्धित्वरूपात्मनेपदार्थस्यापि वसन्तादिवाक्ये विधानाद्वाक्यभेदापत्तिः । "उद्गातारः स्तुवत" इत्यादौ अकर्त्रर्थेपि क्रियाफलदर्शनेन कर्तृमात्रवृत्तिफलकत्वस्यात्मनेपदार्थत्वाभावात् । अत एव (१)"स्वरितञितः कर्त्रभिप्राये क्रियाफले" इत्यादिस्मृतिरपि प्रयोगविरोधादुपलक्षणत्वेन द्रष्टव्या ।

अथ वा तर्ह्यस्तु आत्मनेपदयुक्तमेव अनन्याक्षिप्तशक्तिकं "य एवं विद्वानग्निमाधत्त" इत्याधानोत्पत्तिविनियोगपरं वाक्यम् । तेन चाधातृसम्बन्धित्वस्य प्राप्तत्वात् वसन्तादिवाक्ये न वाक्यभेद इति । सर्वथा निमित्तार्थता ब्राह्मणादिश्रवणस्येति प्राप्ते—

(सिद्धान्तः)

अभिधीयते—नैतदपि निमित्तार्थम्, क्रतुविधिभिरुपनयनस्य तावन्नियमेनानाक्षेपात् । ते हि ज्ञानस्य यद्यपि नियमेनाक्षेपकाः तथापि तत्साधनस्याध्ययनस्य न नियमेनाक्षेपकाः उपायान्तरेणापि तत्सम्भवात् । अध्ययनमपि चोपनयनस्य न नियमेनाक्षेपकम् । अनुपनीतस्यापि तत्सम्भवात् । अतः पक्षे सम्भवत्प्राप्तिकस्योपनयनस्य वसन्तादिवाक्ये सम्भवत्येव विधिः ।

न च गुणसङ्क्रान्तशक्तिना विधिना पक्षप्राप्तमेवोपनयनं भाव्यतयोद्दिश्य नैमित्तिकगुणविधिसम्भवे विशिष्टविधेरन्याय्यत्वमिति वाच्यम् । उपनयनविधेरध्ययनविधेश्च नित्यवच्छ्रवणावगतनित्यवद्वाक्यैकवाक्यताभङ्गभयेन विशिष्टविधेरप्यङ्गीकारात् ।

किञ्च ब्राह्मणकालयोः कस्य निमित्तत्वं कस्य विधेयतेत्यत्र विनिगमनाविरहात् उभयविशिष्टोपनयनविधिः । न च प्राथम्यं

---

१ पा० सू० १-३-७२.

नियामकम् । तस्योद्देश्यताबोधकत्ववत् सप्तम्या उपपदविभक्तित्वप्रसङ्गेन विधेयताबोधकत्वस्यापि सम्भवेनानियामकत्वात् । अनेनैव चाधानवाक्येऽपि विशिष्टविधिर्द्रष्टव्यः ।

किञ्च सम्भारवाक्ये आधानोत्पत्त्यङ्गीकारे आत्मनेपदार्थस्याप्राप्तत्वात् वसन्तादिवाक्येषु वाक्यभेदप्रसङ्गः । न च "उद्गातारः स्तुवत" इति प्रयोगात् कर्तृमात्रवृत्तिफलकत्वस्य नात्मनेपदार्थत्वम् । स्मृतिविरोधेन क्वाचित्कप्रयोगस्य अर्थाविवक्षया साधुत्वमात्रार्थत्वेन स्तोत्रक्रियाजन्यदाक्षिणालाभरूपफलाभिप्रायेण वा उपपन्नत्वात् ।(१)विद्वद्वाक्यस्य चाधानोत्पादकत्वं, वर्तमानापदेशत्वात् यच्छब्दादुपबन्धात् विध्यन्तरार्थवादत्वाच्चायुक्तमेव । इदं हि "एवं सपत्नं भ्रातृव्यमवार्तिं सहत" इत्यर्थवादसहितमपि "अप उपसृजती" त्यादिविशेषविधिविहितानामुदकादिसम्भाराणां "अथ सम्भारान् सम्भरती" ति यः स्थापनाविधिस्तस्य शेषः । यो विद्वानेवमुदकादिस्थापनपूर्वं अग्निमाधत्ते स स्थापनरूपाङ्गसामर्थ्यात् सहायसम्पन्नमपि वैरिणं वर्तनरहितं कुरुते इत्यर्थवादेन स्थापनप्रशंसा । अत आधानप्रापकाभावात् वसन्तादिवाक्ये आधानसम्बन्धिन्यपि विशिष्टविधित्वमेव ।

सोऽपि च नोत्पत्तिविनियोगयोरेव, अपितु कर्तृकालादिरूपाणां गुणानामनन्वयप्रसङ्गेन तत्प्रयोगस्यापि । अत एव आधानापेनयनयोः स्वविधिप्रयुक्तयोरेव लाभात् क्रतुविधयोऽपि तयोः तत्कार्ययोर्वा न प्रयोजकाः तदधिकारिणामेव च त्रैवर्णिकानामधिकारिणां लाभात् न शूद्रस्याप्यधिकारित्वकल्पनया अग्निविद्योपायाक्षेपका इत्यादि लाघवमपि ।

न च अग्निविद्ययोः स्वस्वविधिप्रयुक्तत्वेऽपि नित्यतावेदक-

१ "य एवं विद्वानग्निमाधत्ते" इतीदमत्र विद्वद्वाक्यम् ।

प्रमाणाभावेन नियमेन करणानापत्तेः तदा नित्यैः क्रतुविधिभिस्तदाक्षेपोऽप्यावश्यक एवेति वाच्यम् । नित्यानामपि क्रतुविधीनां लाघवेन परप्रयुक्ताग्निविद्योपजीवित्वे प्रमिते स्वस्वविधिसिद्धाग्निविद्यावतः तदकरणे प्रत्यवायोत्पत्तावपि तद्रहितस्य तदुत्पत्तौ प्रमाणाभावेनाग्निविद्याक्षेपकत्वानुपपत्तेः । एतेन क्रतुविधीनां नित्यत्वात् आधानविधीनामपि फलतो नित्यत्वमिति पार्थसारथ्युक्तिरपास्ता ।

वस्तुतस्तु "अनधीयाना व्रात्या भवन्ति" "स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्"(१)"ब्रह्मक्षत्रविशां काल औपनायनिकः परः" "अत ऊर्ध्वं (२)पतन्त्येते यथाकालमसंस्कृताः" इत्यादिनाध्ययनज्ञानोपनयनानां "नानाहिताग्निर्म्रियेत" इत्यादिश्रुत्या च आधानस्य स्वरूपेणैव नित्यत्वमिष्टम् । न हीयं श्रुतिरनाहिताग्निमरणस्य तत्पुत्रकर्त्तव्यप्रायश्चित्ताधिकारमात्रपरा, पुंश्चल्यादि(३)दर्शप्रायश्चित्तवदिति वाच्यम् । तत्पुत्रकर्त्तव्यप्रायश्चित्तस्य विशिष्यानाम्नातत्वात्, तथात्वे अनाहिताग्निताया उपपातकेषु पाठानुपपत्तेः । अतश्च तदेकवाक्यतयेयमपि श्रुतिः आधानावश्यकत्वपरैव । अतश्च आधानोपनयनयोः नित्यत्वात् न नित्यक्रतूनां तदाक्षेपकत्वप्रसक्तिरिति लाघवम् । अतः कर्त्तृकालविशिष्टोत्पत्तिविनियोगपूर्वकः प्रयोग एव वसन्तादिवाक्यैर्विधीयते ।

न च वसन्तादिवाक्येषु आधानप्रयोगविधिसम्भवेऽपि उत्पत्तिविनियोगयोः (४)सम्भारविधिबलेनापि प्राप्तिसम्भवाद्-

१ म. स्मृ. २-३९. २ त्रयोऽप्येते. ३ दर्शन.

४ "अथ सम्भारान् सम्भरति" इत्ययं विधिस्सम्भारविधिः । अनेन ग्राम्याणां पार्थिवानां वानस्पत्यानां च सम्भारा विधीयन्ते ।

विधानमिति वाच्यम्, तथात्वे आत्मनेपदार्थस्य आधातृवृत्तिफलत्वरूपस्य उत्पत्तौ विनियोगे वा अन्वययोग्यस्य प्राप्तत्वेनानुवादेन विधिः ब्राह्मणादिविशिष्टप्रयोगविधिश्चेति वैशिष्ट्यासम्भवात् वाक्यभेदापत्तेः, (१)संभारवाक्ये "अग्निमादधीते" त्येतावतैव उत्पत्तिविनियोगपरत्वसिद्धौ सम्भारेष्वित्यस्य वैयर्थ्यापत्तेश्च ।

अत एव तत्र "तस्मिन्नाधीयतामय"मिति मन्त्रवर्णात् सम्भवत्प्राप्तिकाया अपि सम्भाराधिकरणतायाः अभ्युदयशिरस्कत्वार्थं विधिः । अतश्च त्रिष्वपि ब्राह्मणादिवाक्येषु प्रयोगवदुत्पत्तिविनियोगयोरपि करणात् प्रयोगभेदवत् आधानस्वरूपस्यापि भेदः ।

अस्तु वा प्राथम्यात् ब्राह्मणवाक्य एवोत्पत्तिविनियोगविशिष्टप्रयोगविधिः । राजन्यादिवाक्ययोस्तु प्रयोगान्वयिकर्तृकालरूपगुणयोगात् प्रयोगभेदमात्रम् । अत एव तत्र कर्तृकालविशिष्टः प्रयोग एव विधीयते । आत्मनेपदार्थस्तु उत्पत्तिवाक्यप्राप्तोऽनूद्यते । सर्वथा ब्राह्मणादिश्रवणानि न निमित्तार्थानि ।

नन्वेवं सम्भारवाक्यादिना उत्पत्तिविनियोगप्रयोगाणां प्राप्त्यभावेऽपि "जातपुत्रः कृष्णकेशोऽग्नीनादधीते" ति वाक्येन वयोवस्थाविशेषापन्नकर्तृविशिष्टाधानविधित्रयमस्तु । अनेकविशेषणविशिष्टविध्यपेक्षया एकविशिष्टविध्यङ्गीकारस्य न्याय्यत्वात् शूद्रादिसाधारणैकप्रयोगविधिसम्भवे ब्राह्मणादित्रयस्य प्रत्येकप्रयोगविध्यङ्गीकारानौचित्याच्च । अतश्च तेनैव प्राप्तानां ब्राह्मणादीनां निमित्तार्थं श्रवणमिति चेत्--

१. "सम्भारेष्वग्निमादधाती" ति सम्भारवाक्यम् ।

न; एवमपि कर्त्तृकालयोः कस्य निमित्तत्वं कस्य विधेयता इत्यत्र विनिगमनाविरहानिवारणात् । अतः सिद्धं ब्राह्मणादेः गुणस्य विधेयत्वात् भेदकत्वमिति । प्रयोजनं स्पष्टम् ।

सूत्रं तु आधाने तुल्यन्यायत्वात् उपनयने च ब्राह्मणादि-श्रवणं क्रतुप्रधानं, आधानादिप्रयोगभेदनियामकमित्यनुपद्यते । आधानादेः सर्वपुरुषशेषत्वेन अप्राप्तत्वादिति अकारप्रश्लेषेण व्याख्येयम् ॥

इति तृतीयमाधानाधिकरणम् ।

अथ चतुर्थं दाक्षायणयज्ञाधिकरणम् (४) ॥

सू—अयनेषु चोदनान्तरं संज्ञोपबन्धात् ॥ २–३–५ ॥ (पू.)

(विषयसंशयौ)

दर्शपूर्णमासयोः "दाक्षायणयज्ञेन यजेत प्रजाकामः" । "साकंप्रस्थायीयेन यजेत पशुकामः" । "सङ्क्रमयज्ञेन यजेता-न्नाद्यकामः" इति श्रुतम् । तत्र किमेवंसंज्ञककर्मान्तरविधिः ? उत दर्शपूर्णमासाश्रितो गुणो दाक्षायणादिपदाभिधेयः फलार्थं विधी-यते ? इति सन्देहः ।

(सङ्गतिः)

पूर्वपक्षे गुणस्याप्रसिद्धत्वादिना अविधेयत्वात् अनिश्चित-विधेयताकस्य सिद्धान्ते गुणफलसम्बन्धाङ्गीकारेऽपि भावनाभेद-कत्वोपपादनात् पादसङ्गतिः । अनन्तरा तु ब्राह्मणत्वादेः गुण-

स्याप्राप्तत्वेन विधेयत्वात् युक्ता भेदकता। प्रकृते तु गुणस्याप्रसिद्धत्वात् कथञ्चित् प्रसिद्धस्य वा वक्ष्यमाणरीत्या प्राप्तत्वात् न भावनाभेदकता युक्ता। यदि परं भेद एवाग्रहः तदा संज्ञादिभिरेव स युक्त इति पूर्वपक्षोत्थानात् द्रष्टव्या। अध्यायसङ्गतिस्तु स्पष्टैव। (१)इन्द्रियकामाधिकरणसिद्धस्यैव गुणफलसम्बन्धस्याक्षेपसमाधानाच्च न तेन पौनरुक्त्यम्।

(पूर्वपक्षः)

तत्र दाक्षायणयज्ञादिपदानां समुदायप्रसिद्ध्या अवयवप्रसिद्ध्या वा गुणविशेषे लोके वेदे वा प्रसिद्ध्यभावात् प्रसिद्धयजिसामानाधिकरण्येन यागनामधेयत्वं तावन्निरवबाधम्। अत एव "पयसा प्रवर्ग्येण चरन्ति" "पयसा दाक्षायणयज्ञेन" इत्यादिप्रसिद्धकर्मनामधेयप्रवर्ग्यपदसामानाधिकरण्यमपि सङ्गच्छते। अन्यथा दाक्षायणपदवाच्यायाः प्रयोगावृत्तेः द्रव्यानपेक्षत्वेन पयोविधानानुपपत्तेः। अतश्च उद्भिदादिसंज्ञावदेवात्र तया कर्मान्तरचोदनैव युक्ता। अत एव दाक्षायणादिपदानां कर्मान्तरेऽवयवशक्त्यसम्भवेऽपि रूढिकल्पनया विजातीययागत्वस्यैव शक्यतावच्छेदकत्वं कल्प्यते इति न दोषः। सूत्रं स्पष्टम्॥

सू—अगुणा च कर्मचोदना ॥ २—३—६. ॥

ननु—नेदं नामधेयम्, दाक्षायणादिपदार्थस्य गुणस्य लोकेऽप्रसिद्धस्यापि वेदात् प्रसिद्ध्युपपत्तेः। तथा हि—

दक्षस्य यजमानस्य इमे दाक्षा ऋत्विजः तेषां कर्तृभूतानामयनं प्रयोगावृत्तिः दाक्षायण इत्येवमवयवव्युत्पत्त्यनुसारेणावगते कियती

१ पू. मी. २–२–११.

आवृत्तिरिति विशेषापेक्षायां "द्वे पौर्णमास्यौ द्वे अमावास्ये यजेते" इति वाक्यान्तरात् द्विरावृत्तिः दाक्षायणपदाभिधेयेत्यवगम्यते ।

तथा साकंप्रस्थाय्यपदेनापि साकं सह प्रस्थानं यत्रेति व्युत्पत्त्या सहप्रस्थानेऽवगते केन सहेत्यपेक्षायां "सह कुम्भीभिरभिक्रामे" दिति वाक्यात् कुम्भीसाहित्यमित्यवगम्यते । एवं सङ्क्रमपदेनापि सङ्क्रमणे उक्ते, क्वेत्यपेक्षायां मन्त्रदेवोक्तविधया आहवनीयरूपहोमदेशे इत्यवगम्यते । अतश्च लोकाप्रसिद्धत्वेऽपि वैदिकप्रसिद्धिमात्रेण दाक्षायणादिपदानां गुणवाचित्वोपपत्तेः दध्यादिवत् फलसम्बन्धो युक्त एवेति चेत्—

न; 'द्वे पौर्णमास्यौ' इत्यादि वाक्यानां प्रकरणात् क्रत्वङ्गतया द्वित्वादिरूपगुणविधायिनां दाक्षायणादिपदार्थतात्पर्यग्राहकत्वानुपपत्तेः । अन्यथा "दध्ना जुहोती" त्यस्यापि आश्रयमात्रपरत्वोपपत्तौ क्रत्वङ्गताबोधकत्वानुपपत्तेः ।

अथ तु तेन क्रत्वर्थतयैव द्वित्वविधावपि अयनपदवाच्यायाः आवृत्तेः प्रमाणाभावादेव अधिकायाः प्रसक्त्यभावात् द्वित्व एव पर्यवसानोपपत्तेः फले विधानमित्युच्येत ततो गुणधात्वर्थयोरुभयोरपि नित्यवत् प्राप्तौ(१)ऐन्द्रवायवाग्रान् गृह्णीयात् यः कामयेत यथापूर्वं प्रजाः कल्पेरन्नि" तिवत्(२) भावार्थाधिकरणन्यायेन धात्वर्थस्यैव फलसम्बन्धोपपत्तेः न गुणफलसम्बन्धोपपत्तिः । दध्यादौ तु नित्यवदनुवादायोगात् तथाङ्गीकार इति वैषम्यम् ।

किञ्च "द्वे पौर्णमास्या" वित्यनेनापि पौर्णमास्यादिपदवाच्यप्रधानत्रयमात्रानुवादेनैव द्वित्वविधानात् प्रकरणेन च तस्यैवाश्रयत्वावगतेः न साङ्गप्रयोगावृत्तिः फले विधातुं शक्यते । वि-

१. तै. स. ७-२-७. २. पू. मी. २-१-२.

वक्षितगुणस्य च दाक्षायणादिपदेनैव वक्तुं शक्यत्वात् यज्ञपद-वैयर्थ्यापत्तिः ।

साकंप्रस्थायीये तु प्रस्थानस्य असाक्रमणविधिनैव प्राप्तत्वादप्राप्तं साहित्यमेव प्रस्थानाश्रितं विधेयम् । न च प्रस्थानस्य प्रणयनादिवदवान्तरप्रकरणमस्ति । सान्नाय्यस्य तु तत्सत्वेऽपि साक्षाद(१)योग्यत्वमिति नाश्रयत्वम् । सङ्क्रमस्य तु आहवनीयाधिकरणकहोमविधिनैवार्थाक्षेपात् उभयप्राप्तौ भावार्थाधिकरण-न्यायेन धात्वर्थादेव फलोपपत्तेः न गुणफलसम्बन्धविध्युपपत्तिः । एवञ्च गुणचोदनाऽसम्भवेन विधेः गुणसङ्क्रान्तशक्तिकत्वाभावात् धात्वर्थभावनयोरेव चोदनाप्रतीतेः अभ्यासादपि भेदसिद्धि-रिति सूत्रार्थः ।

ननु—फलसम्बन्धपरत्वसम्भवेनाभ्यासस्वरूपाभावात् कथं भेद सिद्धिः ? अत आह—

सू—समाप्तञ्च फले वाक्यम् ॥ २–३–७. ॥

"सर्वेभ्यो दर्शपूर्णमासा" वित्यनेन फलसम्बन्धस्यापि प्राप्तत्वात् अनन्यपरत्वमव्याहतमेव । अतोऽभ्यासादपि कर्मभेदसिद्धिः ।

अथ वा फलस्य अनुपादेयस्य सत्वात् प्रकरणान्तरन्यायेनापि भेदसिद्धिः । न च सन्निधानादुपस्थितिः । संज्ञया विच्छेदोपपत्तेः । संज्ञा हि कर्मान्तरबुद्धिं जनयन्त्यपि पूर्वबुद्धिविच्छेदमपि तावज्जनयति । अतः तदंशेऽनुपादेयसहायेन प्रकरणान्तरस्याप्युपपत्तिः। अतो वरं संज्ञाभ्यासप्रकरणान्तरैः कर्मान्तरमेव । न तु गुणफलसम्बन्धः । एवञ्च फलप्राप्तेः क्रियैकजन्यत्वस्वभावोऽपि अनुगृहीतो भवति । अतो नात्र गुणस्य भावनाभेदकत्वम् ।

१. क्रियाया एवाश्रयत्वयोग्यत्वादिति भावः ।

सू—विकारो वा प्रकरणात् ॥ २–३–८. ॥ (सि)

नेदं कर्मान्तरम्, भेदकप्रमाणस्यैवासिद्धेः । न तावद्भ्यासः । प्रकृतस्यैव कर्मणः फले विनियोगसम्भवेन उपपदाभावेऽपि अभ्यासासम्भवात् । न च सार्वकाम्यवाक्येन तत्प्राप्तिः, तेन तत्सम्भवेऽपि 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते' तिवद् अभ्युदयशिरस्कत्वार्थं अनेनैव तद्विधिसम्भवात् ।

नापि प्रकरणान्तरम्; प्रकृतस्यैव कर्मणः विहितत्वेन तदभावात् । न च संज्ञया पूर्वबुद्धिविच्छेदः । संज्ञाभ्यासादीनां स्वाश्रयतावच्छेदकविधेयतावच्छेदकमात्राक्षेपकत्वेन कर्मान्तरबुद्धिजनकत्वेऽपि पूर्वकर्मबुद्धिविच्छेदकत्वाभावात् । न हि तेषां भेदानुपजीवि पूर्वकर्मोपस्थापकप्रमाणाभावः प्रकरणान्तरवत् स्वरूपं सहकारिकारणं वा । तथात्वे तनूनपादादियागोत्तराम्नाताभिक्रमणस्य समिद्यागाङ्गत्वानापत्तेः । अपि तु प्रकरणान्तरस्यैव सः ॥

अत एव तत्र नाम्न एवातिदेशार्थं पूर्वकर्मोपस्थापकत्वाद् भेदानुपजीवीति विशेषणम् । अतश्च प्रकृते पूर्वबुद्धिविच्छेदकाभावात् प्रकरणस्य (१)चोपस्थापकस्य सत्वाद् न प्रकरणान्तरन्यायेन भेदः ।

अत एवाँ "भिदा यजेते" त्यादौ संज्ञयैव भेदो वार्तिके उक्तः, न तु प्रकरणान्तरात् । प्रकृते तु संज्ञाया भेदकत्वं उत्तरसूत्रे निराकरिष्यामः । अतो वक्ष्यमाणरीत्या दाक्षायणादिपदवाच्यस्याऽवृत्त्यादेः गुणस्यैव नित्यगुणविकारतया फलार्थत्वेन विधानम् । एवं चाश्रयत्वेन प्रकृतक्रत्वन्वयात् कथम्भावाका-

---

१ पूर्वोप.

ङ्गालक्षणप्रकरणानुग्रहाभावेऽपि अधिकारात्मकप्रकरणानुग्रहो भवति । इतरथा तद्बाधापत्तिः ।

सू-लिङ्गदर्शनाच्च ॥ २-३-९. ॥

"त्रिंशद्वर्षाणि जीर्णो दर्शपूर्णमासाभ्यां यजेत' यदि दाक्षायणयाजी स्यात् अथापि पञ्चदशैव वर्षाणि यजेत, अत्रैव ह्येषा सम्पद्यते, द्वे पौर्णमास्यौ द्वे अमावास्ये यजेत" इत्यत्र यावज्जीवपक्षानुकल्पतया त्रिंशद्वर्षपक्षमुक्त्वा तदनुकल्पत्वेनापि दाक्षायणयाजिनः पञ्चदशवर्षपक्षमुपदिश्य तदर्थवादे तावतैव त्रिंशद्वर्षसाध्यप्रयोगाप्तिरुच्यमाना आवृत्तेः फलार्थत्व एव युज्येत । तथा हि-

गुणवाक्ये पौर्णमास्यादिपदवाच्यप्रधानमात्रसम्बन्धित्वेन श्रुतापि द्विरावृत्तिः फलवाक्ये दक्षयजमानसम्बन्धिकर्तृत्विक्सम्बन्धित्वेन श्रवणात् दर्शपूर्णमासप्रयोगाश्रितेति विज्ञायते । अतश्च फलार्थमपि सन्ततफलकामेन काकतालीयन्यायेन पञ्चदशवर्षपर्यन्तद्विरावृत्तदर्शपूर्णमासप्रयोगानुष्ठाने तावतैव त्रिंशद्वर्षसाध्यप्रयोगसंख्यासम्पत्तेः पञ्चदशवर्षपक्षस्तुतिरुपपन्ना भवति । कर्मान्तरत्वे तु तस्याव्यक्तत्वे ज्योतिष्टोमविकारत्वात्, दर्शपूर्णमासविकारत्वेऽपि वा पञ्चदशवर्षपर्यन्तमावृत्तावेव प्रमाणाभावः । न चातिदेशेन पञ्चदशवर्षकालीनावृत्तिप्राप्तिः, पञ्चदशादिवाक्येषु यावज्जीववाक्यवत् नैमित्तिकप्रयोगस्यैव पुरुषार्थ(१)त्वेन विधेयत्वेन तस्याः तद्वदेव विकृतावनतिदेशात् ।

नन्वेवं पञ्चदशवर्षकालस्यैव पौर्णमास्यमावास्यावाच्छिन्नस्य जीवनवन्निमित्तत्वापत्तिः । अतश्च यथैव पौर्णमास्याद्यवच्छिन्नस्य

१ पुरुषार्थस्य

वसन्तस्य निमित्तत्वे तस्यैकत्वादेकस्मिन् वसन्ते सकृदेव ज्योतिष्टोमकरणं, निमित्तावृत्तौ चावृत्तिः, तथा पञ्चदशवर्षकालस्यापि पौर्णमास्याद्यवच्छिन्नस्य एकत्वादेकवारमेव दर्शपूर्णमासप्रयोगः तदावृत्तौ च पुनरावृत्तिरिति प्राप्नुयात् । जीवनानान्तु प्रतिपर्व भिन्नत्वात् युक्ता प्रयोगावृत्तिरिति वैषम्यम् । अतो यावज्जीवाधिकरणपूर्वपक्षन्यायेन तावन्तं कालं दर्शपूर्णमासावृत्तिरेव कर्माङ्गत्वेन विधीयते इति कर्मान्तरेऽपि तस्यातिदेशो युक्त एवेति चेत्—

न; आधानाव्यवहितोत्तरकालीनपञ्चदशवर्षत्वादेः निमित्तत्वेऽपि निमित्तपरया अत्यन्तसंयोगवाचिद्वितीयया सातत्यानुष्ठापकत्वरूपनिमित्तत्वावगतेः वसन्तवैषम्यात् । अत एव निमित्तश्रुत्या सातत्यानुष्ठाने प्रसक्ते आहारविहारादिवशेन तद्बाधात् (१)जातेष्टिमासाग्निहोत्रन्यायेन पौर्णमास्याद्यनुग्रहेऽपि सातत्यस्य अत्यन्तबाधायोगात् पुनः पुनः अनुष्ठानोपपत्तिः । प्रमाणान्तरावगताधानाव्यवहितोत्तरत्वबलेन च नाधानोत्तरभाविपञ्चदशवर्षोत्तरं पुनः करणापत्तिः । अतश्च(२)यावज्जीवाधिकरणसिद्धान्तन्यायेन निमित्तपरत्वस्यैवोपपत्तेः नावृत्तेः कर्माङ्गत्वेन विधिरिति पुरुषार्थस्य नैमित्तिकप्रयोगस्य विकृता-

---

१. जातेष्टौ निमित्तानन्तरानुष्ठेयत्वे प्राप्तेऽपि नालच्छेदात् पूर्वं स्तनप्राशननिषेधात् तत्पूर्वमेव च जातकर्मविधानात् जातेष्टेर्जननानन्तरमेव करणे तदनन्तरं जातकर्म कृत्वा छिन्ने नाले प्राशनस्य कर्तव्यतापत्त्या तावता शिशोर्मरणापत्त्या शैथिल्योपप्रसङ्गात् तदर्थं जातेष्टेरुत्कर्षेऽवश्याङ्गीकर्तव्ये उत्कृष्टायाः तस्याः अवैगुण्याय आशौचापगमानन्तरं पौर्णमास्यादिकाल एव मलमासादिरहिते सानुष्ठेयेति चतुर्थे (४-३-१७.) सिद्धान्तितम्, तन्न्यायेनेत्यर्थः ।

२. पू. मी. २-४-२.

वनतिदेशात् कर्मान्तरस्य पञ्चदशवर्षपर्यन्तमावृत्तिः ।

न च भवन्मत इव फलार्थस्यापि कर्मान्तरस्य काकतालीयन्यायेन पञ्चदशवर्षपर्यन्तमावृत्त्युपपत्तिः । तथात्वेऽपि द्विरावृत्तौ प्रमाणाभावेन त्रिंशत्सम्पत्त्यनुपपत्तेः । यदि तु पूर्वपक्षे क्रत्वर्थत्वेन द्विरावृत्तिविधेरिष्टत्वात् कर्मान्तरेऽपि द्विरावृत्तेः प्राप्तिरुच्येत तदा त्रिंशद्वर्षपक्षस्यापि द्विरावृत्त्यैवानुष्ठानापत्तेः सुतरां स्तुत्यनुपपत्तिः ।

अस्तु वा कर्मान्तरस्य त्रिंशद्वर्षसाध्यप्रयोगसंख्याकप्रयोगवत्त्वम् । कथ तावता दर्शपूर्णमासगतपञ्चदशपक्षस्तुतिः । व्यधिकरणत्वात् । अतो लिङ्गदर्शनादपि आवृत्तिरेव फलार्थे विधीयते ।

सू—गुणात संज्ञोपबन्धः ॥ २-३-१०. ॥

यस्त्वया संज्ञोपबन्धो भेदहेतुत्वेनोक्तः, स गुणविधित्वात् दाक्षायणादिपदानामसिद्धः, यद्यपि च गुणो न लोके प्रसिद्धः तथा(१)प्युक्थ्यव्यूढादिवत् वाक्यान्तरप्रसिद्ध एव दाक्षायणादिपदवाच्यत्वेन युक्तस्समाश्रयितुम् ।

वस्तुतस्तु पूर्वोक्तविधया लौकिकावयवप्रसिध्यैव दाक्षायणादिपदानामावृत्त्यादित्राचित्वम्, अत एव दाक्षायणवाक्ये क्र-

१. उक्थ्यग्रहस्य दध्यादिवत् लोकप्रसिध्यभावेऽपि "य एवं विद्वानुक्थ्यं गृह्णाति" इति वाक्योत्पन्नस्यैव तस्य "पशुकाम उक्थ्यं गृह्णीयात्" इति वाक्येन यथा फलार्थे विधानम्, यथा वा व्यूढाख्यस्य द्वादशाहगताग्रताविशेषस्य लोकतोऽप्रसिद्धस्यापि "अथ व्यूढः—ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ, अथेतरेषां दशानामह्नां ऐन्द्रवायवाग्रं प्रथममहः, अथ शुक्राग्रम्, अथ द्वे आग्रयणाग्रे, अथैन्द्रवायवाग्रम्, अथ द्वे शुक्राग्रे, अथाग्रयणाग्रम्, अथ द्वे ऐन्द्रवायवाग्रे" इति वाक्येनोत्पन्नस्यैव "यः कामयेत बहु स्यां प्रजायेयेति स व्यूढेन यजेत" इति वाक्येन फलार्थे विधानं तद्वदित्यर्थः ।

त्विक्संबन्धिनी आवृत्तिरेव फलार्थं विधीयते । तस्याश्चाश्रयापेक्षायां विधेयसामर्थ्यसहकृतप्रकरणेन दर्शपूर्णमासप्रयोग एवाश्रयत्वेन सम्बध्यते । गुणाश्रययोश्च नात्यन्तं दध्यादिवत् भेदः इति सूचनार्थमेव यज्ञशब्दस्समासे ।

वस्तुतस्तु (१)"पूर्वपदात् संज्ञायामगः" इत्यनेन गकारवर्जितपूर्वपदनिमित्तं णत्वं संज्ञायामेव विदधतां संज्ञात्वाभावे णत्वस्यैवानापत्तेः यद्यपि संज्ञात्वमेवावश्यकं, तथाऽप्यवयवार्थप्रतीत्या योगरूढ्यङ्गीकारात् संज्ञात्वेऽप्यावृत्तिविधौ न किञ्चित् बाधकम् । एवञ्च सूत्रमप्याञ्जस्येन सङ्गच्छते । आवृत्तिश्च कियतीति विशेषापेक्षायां 'द्वे पौर्णमास्या' विति वाक्येन द्वित्वविधिः । अत एवापेक्षितविधानात् द्वित्वमपि न क्रतुकर्थभावेन गृह्यते ।

साकंप्रस्थाय्यवाक्येऽपि अवयवव्युत्पत्त्या विशेषणीभूतमप्राप्तं सहत्वमेव फलोद्देशेन विधीयते । न तु प्रस्थानमपि, तस्य नित्यप्रयोगेऽपि(२) होमार्थं प्राप्तत्वेन क्रतुवदविधेयत्वात् । सहत्वस्य चाश्रयापेक्षायां वाक्यान्तरेण(३) "आज्यभागाभ्यां प्रचर्याग्नेयेन च पुरोडाशेनाग्नीधे स्रुचौ प्रदाय सह कुंभीभिरभिक्रामे"दित्यनेनाभिक्रमणं सान्नाय्यहोमाङ्गभूतमाश्रयत्वेन समर्प्यते । अत्र हि प्रकरणात् विधेयसामर्थ्याच्च सान्नाय्यहोमाङ्गभूताक्रमणापरपर्यायाभिक्रमणानुवादेन कुम्भीसाहित्यमेवाश्रयितासम्बन्धेन विधीयते । प्रकरणानुमितवाक्य इव होमानुवादेन दधिविधिः । निपातोपसर्गाणाञ्च परस्परान्वयस्य व्युत्पन्नत्वात् न कुम्भी तत्साहित्यञ्चेति अनेकविधानकृतवाक्यभेदोऽपि । 'कुंभीभि'रिति बहुवचनञ्च प्रकरणात् "सुपां सुपो भवन्ती"त्येवं द्वित्वलक्षणार्थं सदनुवादः । कुंभीनाञ्च सान्नाय्याङ्गत्वात् अभिक्रमणमपि त-

१. पा. सू. ८-४-३. २. प्राप्तावपि ३. आप. श्रौ. ३-१६-१७.

द्धोमसाधनमित्येवं विधेयसामर्थ्यादवगम्यते। अत एव पुरोडाश-प्रचारोत्तरकालत्वाद्यनुवादः। स्रुचामधोधारणस्य चेडावदानाव-धि निषिद्धत्वात् योग्यतयैवान्यस्मै दाने प्राप्ते कर्मकरत्वादग्नीधे दानमनूद्यते। अतश्च प्रस्थानस्य प्रणयनादिवदवान्तरप्रकरणाभा-वेऽपि वाक्येनैवाश्रयत्वं नानुपपन्नम्। सहत्वस्य चाधिकरणापे-क्षायां कुंभी अपि तेनैव लभ्येते इति न किञ्चिदनुपपन्नम्।

एवं सङ्क्रमवाक्येऽपि लोकप्रसिद्ध एव संक्रमणे फलार्थं विहिते किमर्थं क्वेत्यपेक्षायां भवदेवलिखितोन्नीतवचनवशेन होमार्थ आहवनीयदेश इत्यवगम्यते। न च तस्य नित्यवत् प्राप्तत्वात् "ऐन्द्रवायवाग्रान् गृह्णीयाद्यः कामयेत यथापूर्वं प्रजाः कल्पेर"न्नितिवदुभयप्राप्तौ क्रियाफलसम्बन्ध एव युक्त इति शंक्यम्। तत्र हि उभयोः स्वरूपेण नित्यवत् प्राप्तिवत् फलस-म्बन्धेनापि द्वयोः अप्राप्तेः युक्तो भावार्थाधिकरणन्यायेन क्रिया-फलसम्बन्धः। प्रकृते तु द्वयोः स्वरूपेण प्राप्तिवदन्नाद्यफलेऽपि क्रियायाः सार्वकाम्यवाक्येन प्राप्तत्वादप्राप्तगुणविनियोग एव विधिसंक्रमणात् युक्त इन्द्रियकामाधिकरणन्यायेन गुणफलसम्ब-न्ध इति न संज्ञोपबन्धस्य भेदकत्वम्।

सू—समाप्तिराविशिष्टा ॥ २—३—११. ॥

या च क्रियात एव फलप्राप्तिर्दिष्टा न गुणात् इत्युक्तं तद्गुणाद-पि दध्यादेः फलप्राप्तिरविशिष्टैव दृष्टेति न किञ्चिदनुपपन्नम्।

तस्मात् गुणस्यैव युक्तत्वात् युक्तं गुणस्य भावनाभेदक-त्वम्। प्रयोजनं स्पष्टम्।

इति चतुर्थं दाक्षायणयज्ञाधिकरणम्।

म्भनिर्वापयोः सार्वकाम्यवाक्येन प्रयोजकत्वाख्यो भूत्यादि-फलसम्बन्धः। अतो भूतिकामादिपदं अनुवादः। धातु-लक्षणया आलम्भनिर्वापविशेषपरत्वतात्पर्यग्राहकः।

अत एव होमस्य विहितत्वघटितदेवतैकसाध्यत्वेन लोके अभावात् युक्तं तदनुवादेनाहवनीयाविधानम्। आलम्भादेस्तु लोकेऽपि सत्वेन हिरण्यधारणवत् दार्शपौर्णमासिकस्यैवेहानुप-स्थितेर्न तदनुवादेन गुणविधिरित्यपास्तम्। (१)"यावतोऽश्वान् प्रतिगृह्णीयात्" इत्यत्र विधिरूपतात्पर्यग्राहकानुरोधेन धातोर्वैधदा-नलक्षकत्ववत् प्रकृतेऽपि फलपदतात्पर्यग्राहकानुरोधेन वैधाल-म्भादिलक्षकत्वोपपत्तेः।

न चैवमपि अनेकगुणश्रवणात् गुणात् कर्मान्तरत्वापत्तिः। एकस्यैव गुणस्य विधेयत्वेन विधेयगुणानेकश्रवणाभावेन तद-नापत्तेः। आलम्भानुवादेन हि ईषायां श्वेतगुणमात्रं कर्तव्य-तया विधीयते। वायव्यपदं तु सर्ववनस्पतीनां अर्थवादतो वा-युदेवताकत्वसंस्तवात् ईषाद्रव्यपरत्वेनानुवादः। निर्वापानुवादे-न च चरुमितिपदेन लक्षणया स्थाली अधिकरणत्वेन विधीयते। प्राकरणिकश्रौतशूर्पावरोधाद्वा तत्प्रातिपदिकेन स्थालीपारिमितं लक्षणया विधीयते। पञ्चशरावमोदनमितिवच्च स्थालीपरि-मितव्रीहिजातस्यैव चतुर्भिर्मुष्टिभिः निर्वापोपपत्तिः। सौर्यमि-ति चाग्नेयस्यैव द्रव्यस्य तेजोदेवत्यत्वसामान्यादनुवादः।

अथ वा आलम्भाद्यनुवादेन वायव्यादिदेवताविधिरेव ग्रहण इवेन्द्रवायवादेः। श्वेतचरुशब्दौ तु जघन्यौ प्रायिकत्वात् चरु-साधकत्वाच्चानुवादौ।

अथ वा वाक्यादिदेवतासम्बन्धस्य उत्पत्तिशिष्टाग्नेयाद्यव-

१. तै. सं. २-३-१२.

रुद्राग्नेयादियागोपपाद्यत्वानुपपत्तेः फलपदस्वारस्यानुरोधेन च फलोद्देशेन श्वेतचरुगुणौ विधीयेते । वायव्यादिपदं तु सर्वपदार्थानां सूर्यवायुसंबन्धादनुवादः । फलार्थप्राङ्मुखत्वस्य भोजनमिव आलम्भादि रागप्राप्तमपि आश्रयत्वेन सम्बध्यते । सर्वथा न कर्मान्तरम् ।

सूत्रं तु अप्रकरणे यो गुणः सोऽपि न कर्मभेदकः एकगुणसंक्रान्तशक्तित्वेन विधेः कर्मशब्दत्वाभावात् , कर्मान्तरत्वे अविनियुक्तद्रव्यकत्वेन लोकप्रसिद्धसंस्कारत्वानुपपत्तेश्च इति व्याख्येयम् ।

सू—यावदुक्तं वा कर्मणः श्रुतिमूलत्वात् ॥२-३-१३॥ (पू)

(द्वितीयपूर्वपक्षः)

नात्रालंभाद्यनुवादेन गुणविधिः, तथात्वे फलपदस्य स्वार्थस्य वाक्यार्थान्वयाभावेन अविवक्षितार्थकत्वापत्तेः । अश्वप्रतिग्रहेष्टौ तु वाक्यभेदापत्तेः तथाङ्गीकरणमदोषः । एवञ्च आलम्भादेः लौकिकस्यापि सत्वात् दार्शिकस्यैवानुवादे प्रमाणाभावः ।

न चाश्वप्रतिग्रहविधिरपि तत्तात्पर्यग्राहकः इति शङ्क्यम् । तथाङ्गीकारेऽपि विधायकाभावेन गुणविधानानुपपत्तेः । अतो दार्शिकस्यैवालम्भादेः विशेषत उपस्थित्यभावात् न तदनुवादेन गुणविधिः ।

नापि गुणफलसम्बन्धः; आलम्भादेः प्रकरणाभावेनाश्रयत्वानुपपत्तेः । भोजनस्य तु पूर्वोत्तरभाविनिषेधाविषयत्वेन उपस्थितत्वात् आश्रयत्वोपपत्तिरित्युक्तं व्याकरणाधिकरणे । अतो

गुणफलरूपानेकगुणोपादानात् प्रकरणान्तराच्च कर्मान्तरमेवाल-म्भनिर्वापरूपगुणविशिष्टं फलोद्देशेन विधीयते। वायुसूर्यावपि च अस्मिन् पक्षे तत्कालोच्चार्यत्वसम्बन्धेन क्रियान्वयं प्रतिपद्येते। उच्चार्यत्वापरपर्यायमुद्देश्यत्वमेव च देवतात्वं, न त्यज्यमानद्रव्योद्दे-श्यत्वं, गौरवात्। अतो देवतात्वस्य यागाक्षेपकत्वाभावात् यागक-ल्पनेऽपि प्रमाणाभावः। अतो यावदुक्तं विधानमेवेदं, न तु गुणमा त्रस्य। एवं हि कर्मणो धात्वर्थस्य पदश्रुतिमूलकं विधानमादृतं भवतीति सूत्रार्थः॥

सू—यजतिस्तु द्रव्यफलभोक्तृसंयोगादेतेषां कर्म-सम्बन्धात्॥ २–३–१४.॥ (सि)

(सिद्धान्तः)

नेदं श्रौतधात्वर्थविधानम्; तथात्वे उपक्रमस्थदेवतात्ववा-चितद्धितानुपपत्तेः। न चोद्देश्यत्वमेव देवतात्वम्, सूक्तभाजो ह-विर्भाजश्च देवता इति स्मृत्या वैदिकव्यवहाराच्च स्तुतिभाक्त्वरूप-देवतात्ववत् त्यज्यमानहविरुद्देश्यत्वस्यैव देवतात्वात्। अत एव ब्राह्मणोद्देशेन पक्केऽप्यन्ने तदुद्देशेनात्यक्ते देवतात्वाप्रसिद्धिः। अत एव द्रव्यरूपहविस्संयोगाद्धविर्भोक्तृत्वरूपमेव देवतात्वमत्र तद्धितार्थः। तस्या यागैकघटितत्वाद्यागापेक्षायां प्रमाणान्तरे-ण तस्याप्राप्तत्वादनेनैव वाक्येन विधेयत्वप्राप्तौ अध्याहारापेक्ष-या लक्षणायाः लघुत्वात् धातुना यागो लक्ष्यते। शक्यार्थस्तु प्रमा-णान्तरप्राप्तत्वादनूद्यते। लाक्षणिकपदोपादानप्रयोजनञ्च निर्व-पत्यादिधातुमद्वाक्यसम्बन्धित्वरूपप्रकृतिसादृश्यसिद्धिः। याग-विधिप्रकारश्चास्माभिः अनागतावेक्षणन्यायेन आग्नेयाधिकरण

एव प्रदर्शितः । तस्मात् फलोद्देशेन द्रव्यदेवताविशिष्टयागभावनाविधिरेवायमिति युक्तमेवात्र गुणस्य भेदकत्वम् ॥

सूत्रं तु द्रव्यस्य भोक्तृपदवाच्यदेवतायाश्च संयोगाद्याग एवात्र विधीयते । सोऽपि च फलसंयोगादर्थकर्मत्वेन । एतेषां द्रव्यफलभोक्तॄणां यागगतार्थकर्मत्वेन व्याप्तत्वात् इति व्याख्येयम् । यद्यपि चात्र द्वितीयपूर्वपक्षवादिना न संस्कारकर्मत्वमङ्गीक्रियते, तथापि प्रथमपूर्वपक्षवादिना तदङ्गीकरणात् स्वानभिमतत्वसूचनार्थं सिद्धान्ते अर्थकर्महेतुतया फलग्रहणम् ॥

सू—लिङ्गदर्शनाच्च ॥ २—३—१५. ॥

(१)"सोमारौद्रं घृते चरुं निर्वपेत्" इति प्रकृत्य"(२)परिश्रिते याजये"दिति गुणविधिपरे वाक्ये यजिश्रवणं द्रव्यदेवतासम्बन्धात् यागानुमितिमुपोद्बलयति । प्रयोजनं स्पष्टम् ॥

इति पञ्चममीषालम्भाधिकरणम् ॥

अथ षष्ठं वत्सालम्भाधिकरणम् (६) ॥

सू—विशये प्रायदर्शनात ॥ २—३—१६. ॥ (सि)

(विषयसंशयौ)

अग्निहोत्रे दोहाधिकारे "वत्समालभेते" ति श्रुतम् । तत्र किं अग्निषोमीययागानुवादेन वत्सविधिः ? उत अग्निहोत्रहोमाङ्गत्वेन वत्सद्रव्यकयागविधिः ? उत वत्ससंस्कारार्थत्वेनालम्भमात्रविधिरिति । अत्रापवादिकी अनन्तरा सङ्गतिः ।

१. तै. सं. २-२-१०-१.   २. तै. सं. -२-२-१०-२.

(प्रथमपूर्वपक्षः)

तत्र वेदप्रयुक्तालभते "रीषामालभेते" इत्यादौ स्पर्शमात्र-वाचित्वेऽपि दैक्षादिवाक्येषु प्राणिसंयोगेन यागवाचित्वावगमात् नात्रार्थप्राप्तालम्भविधिर्युक्तः । इष्यते च धातूनामनेकार्थत्वात् गमनार्थकस्यापि गमेः स्त्रीसंयोगे मैथुनार्थकत्वम् । अतो यागार्थ-कस्यालभतेः प्रकृतहोमानुवादकत्वेऽपि प्रकृतिभूताग्नीषोमीय-यागानुवादकत्वात् तदनुवादेन विनियोगभङ्गकल्पनयापि वत्स-विधिः । वाक्यीयवत्सजात्या मान्त्रवर्णिकछागजातिबाधेन विक-ल्पेन वा वत्सविधिरिति–प्रथमः पक्षः ।

(द्वितीयपूर्वपक्षः)

द्वितीयस्तु–नालभतिर्यागवाची । स्पर्शवाचकस्यैव दैक्षा-दिवाक्ये देवतापदसमभिव्याहारेण यागलक्षकत्वाङ्गीकारात् । अतश्च 'वत्समालभेते' त्यत्रापि "पूषासीति वत्समुपावसृजती" ति विनियुक्तमन्त्रवर्णकल्प्यदेवताबलेनाघारवद्यागकल्पनोपपत्तेरपूर्व-यागलक्षकत्वमेव ।

अत्र हि नोपावसर्जने मन्त्रविधिः । तथात्वे तस्यापि मान्त्रव-र्णिकदेवताकल्पनया यागरूपत्वापत्तेः । अतो विशिष्टविधिगौरव-परिहारार्थं 'वत्समालभेते' त्यत्र विहितस्यैव यागस्य मान्त्रवर्णि-कदेवताकल्पनफलकमन्त्रमात्रविध्युपगमात् उपावसृजतिरपि याग-लक्षणार्थ इत्यवगम्यते । अतश्च वत्सद्रव्यकः पूषदेवताकाग्नीषो-मीयप्रकृतिको यागोऽग्निहोत्राङ्गत्वेन विधीयते इति ।

(सिद्धान्तः)

सिद्धान्तस्तु–पूषासीत्यस्य पुष्टिगुणयोगेन अदन्तकत्वेन वा (१)पुरोवास्थितवत्सपरामर्शकत्वोपपत्तेः शक्योपावसर्जनाङ्गत्वेनैव

१. पूर्वोपास्थित ।

मन्त्रविध्यवसायात् न यागकल्पकत्वोपपत्तिः । अतश्च द्वितीयया वत्समुद्दिश्य उपावसर्जनविधिवत् आलम्भाख्यसंस्कारविधिरेवायम् । एवं च संस्कारविधिप्रायपाठोऽप्युपपन्नो भवति । न च उपावसर्जनेनैव स्पर्शाख्यस्यालम्भस्यार्थप्राप्तत्वात् न विध्युपपत्तिरिति वाच्यम् । धेनुविनियोगाख्योपावसर्जनेन धेनुसमीपधारणफलकाध्वर्युकर्तृकस्पर्शस्य नियमेन प्राप्त्यभावात् ।

नचैवं दोहनानुपपत्तिः, तस्यान्यकर्तृकत्वेन बाधकाभावात् । अतो वत्ससंस्कारार्थत्वेनालम्भविधिरेवायम् ॥

सूत्रं विशये संशये संस्कारप्रायपाठदर्शनान्निर्णय इति व्याख्येयम् ।

सू—अर्थवादोपपत्तेश्च ॥ २—३—१७. ॥

"वत्सनिकान्ता हि पशवः" इत्यर्थवादे पशूनां वत्सप्रियत्वात् समीपधारणफलकस्पर्शेन प्रस्नवनं जायत इति स्तुतिरालम्भविधित्वे सत्युपपद्यते न यागपरत्वे ।

प्रयोजनं स्पष्टम् । अत्र च सिद्धान्ते दार्शपौर्णमासिकेषालम्भादयमालम्भः संस्कार्यरूपानुपादेयगुणयोगात् प्रकरणान्तरन्यायेन कर्मान्तरमिति सिद्ध्यति । ततश्च वत्साख्यगुणस्यानिश्चितविधेयताकस्य भेदप्रयोजकत्वात् पादसङ्गतिरध्यायसङ्गतिश्च ॥

इति षष्ठं वत्सालम्भाधिकरणम् ॥

—:०:—

अथ सप्तमं चरूपधानाधिकरणम् (७)॥

सू-संयुक्तस्त्वर्थशब्देन तदर्थः श्रुतिसंयोगात् ॥ (सि) ॥ २-३-१८. ॥

(विषयसंशयौ)

अग्नौ "नैवारश्चरुर्भवति, बृहस्पतेर्वा एतदन्नं यन्नीवाराः" इत्युक्त्वा 'चरुमुपदधाति' इति श्रुतम्। तत्र किं चरुद्रव्यं बृहस्पतिदेवता च भावनाधात्वर्थयोर्भेदिका उत नेति संशयः।

(सङ्गतिः)

तत्र पूर्वपक्षे नैवारवाक्ये चरुरूपस्य द्रव्यस्य आर्थवादिक्याश्च बृहस्पतिदेवताया रात्रिसत्रन्यायेन विधेयत्वात्, सिद्धान्ते चाविधेयत्वात् अनिश्चितविधेयताकस्य द्रव्यदेवताख्यस्य गुणस्य भेदकत्वनिरूपणात् पादाध्यायसङ्गतिः। अनन्तरा तु पूषासित्यस्य द्रव्यपरत्वेनैव उपपत्तेः न मान्त्रवर्णिकदेवताकल्पनद्वारा यागपरत्वनिश्चायकत्वम्। प्रकृते तु अर्थवादस्थबृहस्पतेरन्यपरत्वासम्भवात् आर्थवादिकदेवताकल्पनावश्यम्भावेन यागकल्पनोपपत्तेर्युक्ता भेदकतेति पूर्वपक्षोत्थानात् द्रष्टव्या।

(पूर्वपक्षः)

तत्र नैवारवाक्ये तावत् भवत्याक्षिप्तायां नैवारकार्मिकायां भावनायां अप्राप्तत्वलक्षणविधिना विहितायां चरोः प्रयोजनाकाङ्क्षत्वात् भावनायाश्चावच्छेदकधात्वर्थापेक्षत्वात् किंचिद्धात्वर्थकल्पनमावश्यकम्। न च उपधानमेव स इति शङ्क्यम्। उपधानं प्रति चरोर्द्वितीयया संस्कार्यत्वावगमेन करणत्वासम्भवात्। अतः उपधानभावनातो भिन्नैवेयं चरुद्रव्यकयागकरणिका भावना।

नचैवमपि देवताभावात् यागत्वमसायकाभावः । अर्थवादे बृहस्पतेः षष्ठ्या नीवारसम्बधावगमात् सम्बन्धान्तरासम्भवेन देवतात्वस्यैवागतेः तस्य यागं विनानुपपत्तेः यागत्वमसयात् । तैत्तिरीयशाखायान्तु "बार्हस्पत्यो भवती" त्येवं तद्धितान्त एवार्थवादः श्रुत इति देवतात्वावगतिः स्पष्टैव । अतो द्रव्यदेवतासम्बन्धानुमितो याग एवाग्नेयप्रकृतिको विधीयते । 'चरुमुपदधाती'ति तु स्विष्टकृदादिप्रतिपत्तिबाधेन प्रतिपत्त्यन्तरविधिरिति प्राप्ते—

(सिद्धान्तः)

अभिधीयते—सर्वत्र विध्यपेक्षित एवार्थोऽर्थवादोन्नीतविधिना विधीयते, न त्वनपेक्षित इति स्पष्टं पर्णतादौ । प्रकृते च नैवारवाक्ये यद्यपि नैवारचरुविशिष्टभावनाविधिस्स्यात् तथापि तस्याः प्रयोजनाद्याकाङ्क्षायामुपधानस्यैव श्रुतस्य तत्त्वेनान्वयोपपत्तेः नार्थवादो देवतादिकल्पनायै प्रभवति । नचैवं चरोर्द्वितीयान्तत्वानापत्तिः । उपदधातेस्सकर्मकत्वेन चरुमिति द्वितीयाया अनीप्सितकर्मत्वेनाप्युपपत्तेः ।

वस्तुतस्तु एतादृशविषये सक्तुष्विव करणत्वलक्षणाया आवश्यकत्वात् वाक्यद्वयेऽपि विधिगौरापत्तेश्च नैवारवाक्येऽपि नीवारमात्रमेव प्रकृतित्वसम्बन्धेन चरुकर्मकभावनानुवादेन विधीयते । उपधानवाक्ये तु चरुसंस्कारकत्वेन विहितमप्युपधानं संस्कारविध्यन्यथानुपपत्त्या "अध्वर्युं वृणीत" इतिवत् चरोस्सामर्थ्यात् कर्मोपयोगिस्थण्डिलनिष्पत्त्यर्थत्वेन उपयोगं कल्पयति । अतश्च सामर्थ्यकल्पितेन विधिना चरुभावनायाः प्राप्तत्वात्तदनुवादेन नीवारमात्रविधिर्नानुपपन्नः ।

न च स्थण्डिलनिष्पत्तेः श्रौतेष्टकावरुद्धत्वात् कल्पितचरुसा-

ध्यत्वानुपपत्तेरर्थकर्मैवेदमुपधानं चयनप्रदेशे विधीयते इति केषांचिदुक्तं युक्तम्। चरोर्भवदेवोक्तविधया इष्टकासन्धिपूरणार्थतया विधेयत्वेनेष्टकाविरोधित्वाभावात्। अन्यथा अर्थकर्मत्वपक्षेऽपि आनुषङ्गिक्याः स्थलनिष्पत्तेरावश्यकत्वेनेष्टकाविरोधस्य दुष्परिहरत्वात्। अतश्च श्रौतकर्मत्वत्यागे प्रमाणाभावात् चरुविनियोगविधिकल्पनात् तदनुवादेन नीवारमात्रविधिरेव युक्तः। अतश्च विधेर्देवतानाकाङ्क्षत्वात् नार्थवादतस्तत्कल्पनम्।

अत एव यत्रापेक्षा तत्रैव तत्कल्पनमिष्टम्, यथा—पूर्णाहुतिविधिवाक्यशेषे "अन्नादं वा एतमात्मनो जनयते यदग्नि"मिति (१)वाक्यशेषे अग्नेः। प्रकृते त्वनपेक्षत्वात् न तत्कल्पनमिति विशेषः। अत एव 'मुन्यन्नं ब्राह्मणस्योक्तम्' इत्यादिस्मृतिपर्यालोचनया बृहस्पतेर्ब्राह्मणस्य मुन्यन्नभूता नीवारा अन्नमिति अर्थवादो व्याख्येयः। तैत्तिरीयशाखास्थार्थवादगततद्धितोऽपि अनेनैव सम्बन्धेन व्याख्येयः। न तु देवतात्वपरः। देवतात्वस्य त्यज्यमानद्रव्योद्देश्यत्वे सति विहितत्वपर्यन्तस्य वृद्धव्यवहारसिद्धतया विधिसमभिव्याहाराभावेऽप्रतीतेः। न च यदाग्नेयादिवाक्य इव विधिकल्पनम्। विध्यन्तरैकवाक्यताभङ्गभयेन तदनुपपत्तेः। अतो न नैवारवाक्ये यागो, न वा तत्करणकं भावनान्तरमिति सिद्धम्। प्रयोजनं स्पष्टम्॥

सूत्रं तु स्थलनिष्पत्तिरूपार्थोन्नायकेन शब्देनोपदधातिना संयुक्तः चरुः स्थलनिष्पत्त्यर्थ एव, तादृशप्रयोजनोन्नायकशब्दसंयोगस्य श्रौतत्वादिति व्याख्येयम्॥

इति सप्तमं चरूपधानाधिकरणम्॥

---

१. वाक्यशेषात्।

अथाष्टमं पात्नीवताधिकरणम् (८) ॥

सू—पात्नीवते तु पूर्वत्वादवच्छेदः ॥ २—३—१९. ॥(सि)

(विषय संशयौ)

"त्वाष्ट्रं पात्नीवतमालभेते" अनेन यागं विधायाम्नायते-"पर्य्यग्निकृतं पात्नीवतमुत्सृजती"ति । तत्र कर्मान्तरविधिः ? उत पूर्वस्मिन् यागे गुणमात्रविधिरिति चिन्त्यते ।

(पूर्वपक्षः)

पत्नीवद्देवतालक्षणस्य गुणस्याऽनिश्चितविधेयताकस्यैव भेदकत्वविचारात् पादाध्यायसङ्गतिः । पूर्वत्रार्थवादस्थतद्धितस्य देवतापरत्वे निरस्ते विधिस्थस्य (१)तस्य निस्सन्दिग्धस्य देवतापरत्वोपपत्तेः यागानुमापकत्वोपपत्तिरिति पूर्वपक्षोत्थानात् अनन्तरा च ।

तत्र यद्यपि पूर्वयागोपस्थापकं प्रकरणमस्ति तथापि तस्य पत्नीवद्देवत्यत्वाऽसम्भवात् कर्मान्तरत्वम् । तथा हि—

न तावत् पत्नीवद्देवत्यताऽनूद्यते । पूर्वयागस्य त्वष्टृपत्नीवद्देवत्यत्वेन शुद्धपत्नीवद्देवत्यत्वाप्राप्तेः । अतश्च यथैवा "ग्नेयं चतुर्धा करोती" त्यत्र तद्धितसामर्थ्यभङ्गभयेन नाग्नीषोमीयादेः ग्रहणं तथा प्रकृतेऽपि । न च (२) "पत्नीवंतं ग्रहं गृह्णामी" त्यत्र मन्त्रवर्णोपात्ताग्निपरत्वस्येव पत्नीवच्छब्दस्य यौगिकत्वात् विशेष्यापेक्षायां उत्पत्तिवाक्यावगतत्वष्ट्राख्यविशेष्यपरत्वोपपत्तेः अविरोधेनानुवादोपपत्तिरिति वाच्यम् । पत्नीवच्छब्दस्यात्र वाजिशब्दस्येव देवताविशेषे रूढत्वेन विशेष्यानपेक्षत्वात् "पात्नीव-

---

१. तस्य निस्सन्दिग्धस्य । २. तै. सं. १-४-२७.

तं गृह्णाती" त्यादौ तु अनन्यगतिकमन्त्रवर्णानुरोधेन यौगिकत्वाङ्गीकरणम् । प्रकृते तु "वाजिभ्यो वाजिन" मितिवत् कर्मान्तरत्वेनाप्युपपत्तेः तात्पर्यग्राहकाभावेन रूढित्यागे न किञ्चित्कारणमस्ति । अतो न तावत् पत्नीवद्देवत्यताऽनूद्यते ।

नापि पूर्वत्रैव यागे विधीयते । उत्पत्तिशिष्टत्वष्ट्टविरोधात् । अतो वाजिनवदेव गुणादेवताविशिष्टयागान्तरविधानम् ।

किञ्च यागान्तरविधानाभावे किं त्वया विधेयम् ? न तावत् स एव यागः, प्राप्तत्वात् । नापि तत्र देवतान्तरम्, उत्पत्तिशिष्टत्वष्ट्टविरोधात् । नापि पर्यग्निकरणम्, तस्यातिदेशप्राप्तत्वात्, नापि पर्यग्निकरणोत्तरकालतोत्सर्गे, तस्या अप्यतिदेशेनैव लाभात् । नापि पर्यग्निकरणाव्यवहितोत्तरकालता त्यागाख्ये उत्सर्गे, निष्ठासंज्ञकक्तप्रत्ययस्य व्यवहिताव्यवहितसाधारण्येन भूतकालमात्रवाचित्वेऽपि उत्तरकालताया एवात्र लक्ष्यत्वोपपत्तेः अतिदेशानुरोधेन कथंचिद्व्यवहितकालक्षणेऽपि अव्यवहितोत्तरकालतालक्षणायां प्रमाणाभावात् । नचैतद्वाक्यानर्थक्यम्, कर्मान्तरविधायकत्वेनाप्युपपत्तेः ।

एतेन प्राजापत्येषु "तान् पर्यग्निकृतानुत्सृजन्ति, ब्रह्मसाम्न्यालभते" इतिवदानन्तर्यलक्षणामप्यङ्गीकृत्य पर्यग्निकरणोत्तरकालीनानामङ्गानामुत्सृजतिनाऽऽनन्तर्यनिषेधः क्रियत इत्यप्यपास्तम् । तत्र हि देवताभावेन कर्मान्तरविधानानुपपत्तेः ब्रह्मसामादिकालविधानाच्च सर्वाङ्गप्रतिषेधानुपपत्तेः युक्तः पर्यग्निकरणानन्तर्यप्रतिषेधः, प्रकृते तु कर्मान्तरविधायित्वेनोपपत्तौ न लक्षणाङ्गीकारे प्रमाणमस्तीति वैषम्यम् ।

न चैवमपि गृहमेधीयाज्यभागन्यायेनापूर्वताज्ञापनद्वारा इतराङ्गपरिसंख्याफलकः पर्यग्निकरणमात्रविधिः तदन्ताङ्गकलाप-

विधिर्वास्त्विति वाच्यम्। "आज्यभागौ यजती"त्यनेन हि अनुष्ठेयत्वेन प्रतीतयोस्तयोः प्रमाणान्तरमन्तरेणैव गृहमेधीयाङ्गत्वावगतेर्युक्तं नैराकाङ्क्ष्यापादनमुखेनेतराङ्गप्रापकप्रमाण्यपरिलोपकत्वम्। प्रकृते तु निष्ठायोगेन पर्यग्निकरणस्य प्रमाणान्तरेण नित्याङ्गभावप्रतीतेः अतिदेशव्यतिरेकेण चात्र प्रमाणान्तराभावात् तत्परिलोपकत्वानुपपत्तिः। तदन्ताङ्गकलापस्य तु वाचकपदाभावात् विधिर्दूरापास्त एव। तस्मात् द्रव्यदेवतासम्बन्धकल्पितयागान्तरविधिरेवायम्। पर्यग्निकृतशब्दस्तु "आग्नेयं सवनीयं पशु"मित्यत्र पशु(१)शब्द इवानुवादः प्रकृतिप्राप्तत्वात्। अतो यागान्तरमेवेदम्। त्वाष्ट्रप्रकृतितयाऽग्नीषोमीयपशुप्रकृतितया दर्शपूर्णमासप्रकृतितयैव वा विधीयते इति प्राप्ते—

अभिधीयते—नात्र कर्मान्तरविधिः, पूर्वस्यैव प्रकरणेन प्रत्यभिज्ञानात्। न च पत्नीवद्वत्त्याऽनुवादानुपपत्तिः, सत्यप्युत्पत्तिवाक्ये त्वष्टृपत्नीवतोः अग्नीषोमादिवच्चासज्यवृत्तिदेवतात्वे(२) मनोतास्थाग्निशब्दस्येव पत्नीवच्छब्दस्यापि लक्षणया देवतापरत्वोपपत्तेः। "आग्नेयं चतुर्धा करोती"त्यत्रापि यदि प्रकरणे केवलोऽग्निर्न स्यात् ततोऽग्नीषोमौ लक्षयेदेव; केवलाग्नेयसत्त्वात्तु न लक्षणेति स्पष्टं तदधिकरणे।

वस्तुतस्तु पत्नीवच्छब्दस्य यौगिकत्वाद्विशेष्यविशेषापेक्षायां पात्नीवतग्रहे मन्त्रवर्णोपात्ताग्नेरिवोत्पत्तिवाक्यावगतत्वष्टुरपि ग्रहणोपपत्तेः न लक्षणा; न वाश्विवाजिशब्दानामिव पत्नीवच्छब्दो न यौगिकः, रूढिकल्पने प्रमाणाभावात्, किमुत यदोत्पत्ति-

---

१. शब्दस्येव २. "त्वꣳ ह्यग्ने प्रथमो मनोता" इति अग्नीषोमीयपशुयागप्रकरणगतमन्त्रस्थाग्निशब्दस्य केवलस्याप्यग्नीषोमलक्षकत्वं यथा तद्वत् पत्नीवच्छब्दस्य त्वष्टृपत्नीवदुभयलक्षकत्वोपपत्तिरित्यर्थः।

वाक्य एव पृथक्तद्धितश्रवणात् 'अग्नये शुचये' इतिवत् सत्यप्यधिष्ठानैक्ये देवतात्वभेदावगतेः पत्नीवतोऽपि पृथगस्त्येव देवतात्वम्, तदा पत्नीवच्छब्देन तन्मात्रानुवादे न कश्चिद्विरोधः।

नचैवं देवतात्वभेदे एकार्थत्वाद्विकल्पापत्तिः, द्वयोरप्येकवाक्योपादानात् 'अग्नये शुचय' इतिवदेव पार्ष्णिकान्वयावगतेः पत्नीवच्छब्दस्य विशेष्यसापेक्षत्वेन च समुच्चयप्रतीतेः। अतश्च सत्यपि समुच्चये डित्थडवित्थमातर्यपि मातृत्वस्य प्रत्येकवृत्तित्वात् डित्थमातेति प्रयोगवत् समुच्चितोभयदेवत्वेऽपि पात्नीवतपदव्यपदेशोपपत्तिः। अतश्च भेदकप्रमाणाभावात् पूर्वयागानुवादेनैवात्र गुणमात्रविधिः, लाघवात्। गुणोऽपि च नात्र पर्यग्निकरणमात्रम्, अपि तु क्तप्रत्ययान्तपदावगतं कृतपर्यग्निकरणत्वम्। तस्य च पूर्वाङ्गेष्वकृतेषु असम्भवात् तान्याक्षिप्यन्ते इति फलतः पर्यग्निकरणान्ताङ्गकलापो विधीयते। तस्य च भेदकप्रमाणाभावेन प्राकृतस्यैव विधेयत्वात् अतिदेशेन सम्भवत्प्राप्तिकत्वेऽपि क्लृप्तोपकारत्वेन ततः पूर्वमेव गृहमेधीयाज्यभागन्यायेन विधानावगतेः तावतैव क्रतुप्रयोगविधेर्नैराकांक्ष्यापादनेनातिदेशकल्पनप्रतिबन्धात् उत्तराङ्गव्यावृत्तिफलकत्वोपपत्तिः।

नचाज्यभागयोः अनुष्ठेयतया प्रतीतयोः प्रमाणान्तरं विनापि गृहमेधीयाङ्गत्वप्रतीतेः अतिदेशप्रतिबन्धकत्वोपपत्तावपि पर्यग्निकरणान्तत्वस्य क्तप्रत्ययेन प्रमाणान्तरविहितत्वावगतेःअतिदेशोपजीवित्वेन तत्प्रतिबन्धकत्वानुपपत्तिः इति वाच्यम्।(१)प्रोक्षिताभ्यामुलूखलमुसलाभ्यामित्यादौ प्रमाणान्तरमन्तरेणापि वि-

१. 'प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहन्ती'त्यत्र प्रमाणान्तरेणाप्राप्तस्य प्रोक्षणस्यार्थवालूखलमुसलाङ्गत्वेन विधीयमानत्वेऽपि क्तप्रत्ययप्रयोगदर्शनादित्यर्थः।

धानदर्शनात् । निष्पन्नत्वप्रतीतिस्तु एतद्विधिविधानोत्तरकालीनावस्थाऽभिप्रायेण । विस्तरेणचैत(?)न्नवमे "पर्यग्निकृतानारण्यानुत्सृजती"त्यत्र निरूपयिष्यते । नचैवं पौनरुक्त्यापत्तिः,तत्र पर्यग्निकृतानुवादेन विशिष्टदेवतोद्देशानिरपेक्षोत्सर्गाख्यत्यागविधेराशङ्कितस्य देवतासंयोगाभावेन निरासात् । तस्मात् त्वाष्ट्रयागमेवोत्सृजतिनानूद्य पर्यग्निकरणान्ताङ्गरीतिर्विधीयते । पात्नीवतशब्दस्तु नित्यानुवादः ।

प्रयोजनं पूर्वपक्षे त्वाष्ट्रयागस्य ब्राह्मणतर्पणान्तमनुष्ठानं, पात्नीवतयागस्य च दर्शपूर्णमासस्थाग्नेयप्रकृतितया । सिद्धान्ते तु त्वाष्ट्रस्यैव पर्यग्निकरणान्तमिति ।

सूत्रं तु पात्नीवते पूर्वस्यैव त्वाष्ट्रस्य प्रत्यभिज्ञानात् तदन्ताङ्गकलापविधानेन फलतोऽवच्छेद एवोत्तराङ्गानामिति व्याख्येयम् ॥

इत्यष्टमं पात्नीवताधिकरणम् ॥

अथ नवममंश्वदाभ्याधिकरणम् ॥ (९) ॥

सू—अद्रव्यत्वात्तु केवले कर्मशेषस्स्यात् ॥ २-३-२० ॥

(विषयसंशयौ)

अनारभ्य श्रूयते(२) "एष ह वै हविषा हविर्यजति योऽदाभ्यं गृहीत्वा सोमाय यजते" इति, तथा(३)"परा वा एतस्यायुः प्राण एति योंऽशुं गृह्णाती"ति च। तत्र किं ज्योतिष्टोमोद्देशेन यागान्तरविधानमिदम्? उत ग्रहान्तरविधानमिति ।

---

१. ९-४-१२. २-३. तै. सं. ३-३-४-२.

(सङ्गतिः)

पूर्वं पर्यग्निकृतवाक्ये यागानुवादेन गुणविध्यङ्गीकारात् यागान्तरविधौ निरस्ते तत्प्रसङ्गादिहापि तन्निराकरणादनन्तरसङ्गतिः ।

(पूर्वपक्षः)

तत्र न तावदत्र ग्रहणमात्रविधिश्शक्यते कर्तुम् । स ह्यंश्वदाभ्यपदयोर्नामधेयत्वमङ्गीकृत्य वा ? गुणपरत्वमङ्गीकृत्य वा ? नाद्यः, ग्रहणस्य संस्कारकर्मणः संस्कार्यावच्छेदेनैव व्यवच्छेदसिद्धेः नामधेयानपेक्षणात्, गृह्णातेः सकर्मकत्वात् नित्यं कर्मसाकाङ्क्षत्वेन तदभावे ग्रहणविधानानुपपत्तेश्च । अदाभ्यशब्दस्य हिंसाख्यदम्भानर्हद्रव्यवाचकत्वादंशुशब्दस्य निर्यासशक्तत्वेन नामधेयत्वानुपपत्तेश्च ।

नान्त्यः; अव्यभिचरितक्रतुसम्बन्धाभावेन द्रव्यमात्रोद्देशेन संस्कारविधानानुपपत्तेः । अदाभ्यवाक्ये यागविशिष्टद्रव्योद्देशे वाक्यभेदापत्तेश्च । ज्योतिष्टोमे सोमस्य देवतात्वेन अप्राप्तत्वात् तस्याः ग्रहणस्य च विधाने वाक्यभेदापत्तेश्च । देवताविशिष्टग्रहणविधाने क्तप्रत्ययान्तपदोत्तराम्नातायाः पूर्वान्वये विधौ समाप्तपुनरात्तत्वरूपदोषापत्तेश्च ।

न च (१) "यत्ते सोमादाभ्यं नाम जागृवि तस्मै" इत्यादिमन्त्रवर्णादेव सोमदेवताया ग्रहणे प्राप्तत्वाद्विधिस्थसोमपदस्यानुवादत्वेन न समाप्तपुनरात्तत्वदोष इति वाच्यम् । अंशौ "उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामि" इति मन्त्रवर्णेन ग्रहणे देवतायाः प्राप्तत्वेऽपि अदाभ्ये "यत्ते सोमे" ति मन्त्रस्य स्वाहाकारान्तस्य होमलिङ्गकत्वेन ग्रहणलिङ्गकत्वाभावात् अत्र देवताप्रा-

१. तै. सं. ३-३-३-२.

त्यनुपपत्तेः । होम एव मान्त्रवर्णिकदेवतायाः प्राप्तिमङ्गीकृत्य सोमायेत्यस्यानुवादाभ्युपगमे ज्योतिष्टोमस्य व्यक्तत्वापत्तेश्च ।

अस्तु वोभयत्रापि ग्रहणे देवताप्राप्तिः । तथापि तदुपपादकस्य 'ऐन्द्रवायवं गृह्णाती'त्यत्रेव प्रकृतस्य यागस्याभावात् न ग्रहणे देवताविधिस्सम्भवतीति नात्र(१)ग्रहणविधिर्युक्तः । अत एव देवतारूपस्य गुणस्य ग्रहणेऽसम्भवन्निवेशस्य यागान्तरावेदकत्वात् पादाध्यायसङ्गतिः । देवतारूपस्य च गुणस्य सिद्धान्ते ग्रहणे विधेयत्वात्, पूर्वपक्षे च यागे विधेयत्वात् सन्दिग्धविधेयताकत्वम् । अतश्च अंश्वदाभ्यद्रव्यको याग एव गृह्णातिना विधीयते, अंश्वदाभ्यनामको वा । तत्तद्द्रव्यकत्वपक्षे तावत् अदाभ्यवाक्येऽदाभ्यपदेन हिंसानर्हद्रव्यमात्रप्रतीतावपि 'हविषा हविर्यजति' इत्यर्थवादादेव देवताभिन्नसोमप्रतीतिः । अतश्च सक्तुन्यायेन विनियोगभङ्गं प्रकल्प्य सोमद्रव्यको यागः मान्त्रवर्णिकदेवतासम्बन्धकल्प्यो गृह्णातिना लक्षयित्वा यजत्यभिहितज्योतिष्टोमाङ्गत्वेन विधीयते । सोमद्रव्यकत्वसादृश्येन ज्योतिष्टोमधर्मातिदेशा(२)च्च ग्रहणस्य प्राप्तत्वेनानुवादोपपत्तेः यजतिनैव यागान्तरं ज्योतिष्टोमाङ्गत्वेन विधीयते । ज्योतिष्टोमशेषत्वे च प्रमाणं तैत्तिरीयशाखास्थं प्राकरणिकं वाक्यम् ।

एवमंशुवाक्येऽपि "प्रजापतये स्वाहे" ति मन्त्रवर्णप्राप्तदेवताकोंऽशुद्रव्यको यागो ज्योतिष्टोमोद्देशेन विधीयते । नामधेयत्वपक्षेऽपि च देवतासम्बन्धबलादेव यागे कल्पितेऽतिदेशात् पुरोडाशादिद्रव्यलाभः । अस्तु वा अंशुवाक्ये प्रमाणान्तरेण देवताया अप्राप्तिः, तथापि ग्रहणे नाम्नोऽनन्वयात् अंशुसंज्ञकं अनिर्धारितविशेषावच्छिन्नं कर्म कुर्यादित्युक्ते अव्यक्तत्वेन अतिदे-

---

१. गुण २. वा

शतो द्रव्यदेवतालाभे सति यागत्वसिद्धिः । अतो यागान्तरविधानमेवैतदिति प्राप्ते—

(सिद्धान्तः)

अभिधीयते—नेदं यागान्तरविधानम्, गृह्णातौ लक्षणायां प्रमाणाभावात्, भेदकप्रमाणाभावेन यागान्तरत्वे प्रमाणाभावाच्च । न च देवतासंयोगलक्षणो गुणः सः, देवतासंयोगलक्षणस्य गुणस्य श्रौतेऽपि ग्रहणे निवेशसम्भवेन यागाभेदकत्वात् ।

नचैन्द्रवायवादिवत् यागप्रकरणाभावात् अनिवेशः । प्रकरणाभावेऽपि तैत्तिरीयशाखास्थवाक्येन ज्योतिष्टोमस्याङ्गिताबोधवत् उपपादकताबोधस्याप्युपपत्तौ ग्रहणे देवतासंयोगस्योपपत्तेः । अतश्च अंशौ तावत् मान्त्रवर्णिकया देवताया ग्रहणाङ्गत्वं सुकरमेव । मन्त्रस्य लिङ्गेन ग्रहणाङ्गत्वावगमात् । यस्तु होममन्त्रः स उत्तरभावियागोपकारकतासम्बन्धेनैन्द्रवायवाभ्याससम्बन्धियाज्यादिमन्त्रवत् यागीयदेवताप्रकाशकत्वेऽपि न देवताया यागाङ्गतापरः ।

न च तद्वदिह ग्रहणाङ्गताबोधकवाक्याभावात् विनिगमनाविरहः । ग्रहणप्रकरणस्यैव नियामकत्वात् । अदाभ्यवाक्येऽपि यद्यपि मन्त्रवर्णात् ग्रहणाङ्गतया न देवताप्राप्तिरस्ति तथापि विधिवाक्य एव लक्षणाभिया विनियोगभङ्गातिदेशकल्पनादिदोषभिया च समाप्तपुनरात्तत्वमेवैकं व्यवहितकल्पनावदङ्गीकृत्य गुणसङ्क्रान्तशक्तिना विधिना देवताविशिष्टं ग्रहणमेव यागोद्देशेन विधियते ।

न च लक्षणादिदोषभिया ग्रहणविध्यङ्गीकारेऽपि देवताया मन्त्रवर्णेनैव प्राप्तिसम्भवात् न तद्वैशिष्ट्यस्यापि विधेयत्वमिति वाच्यम् । मन्त्रवर्णस्य हि ज्योतिष्टोमयागाङ्गतया देवताप्रापक-

त्वमभ्युपगम्यते?ग्रहणाङ्गतया वा? नाद्यः; सामान्यसम्बन्धबोधकप्रमाणाभावेन मन्त्रस्य तदङ्गत्वे प्रमाणाभावात् । नान्त्यः, मन्त्रस्य स्वाहाकारान्तलिङ्गत्वेन सन्निधिमात्रेण ग्रहणाङ्गत्वानुपपत्तेः । (१)"शुक्रं ते शुक्रेण गृह्णामी"ति मन्त्रेण लिङ्गविनियुक्तेन सन्निधिबाधाच्च ।

अत एव तद्विध्यभावेन देवताप्राप्तेरभावाद्विधिनैव देवता विधेया । सापि न पूर्वयागे यागान्तरे वा । वाक्यभेदविनियोगभङ्गादेः विना कारणं निष्प्रमाणकत्वात्, देवतामात्रविधानेऽपि 'अदाभ्यं गृहीत्वा' इत्यस्यानर्थक्यप्रसङ्गाच्च । अतः समाप्तपुनरात्तत्वरूपदोषमेवाङ्गीकृत्य देवताविशिष्टं ग्रहणमेव यागोद्देशेन विधीयते । अतो न तावत् गुणो भेदकः ।

नाप्यदाभ्यवाक्ये उत्तरकालतारूपानुपादेयगुणश्रवणात् यागान्तरम् । अनुपादेयगुणस्य स्ववृत्तिविध्युत्तारणपूर्वकं पारिशेष्याद्धात्वर्थवृत्तित्वबोधनद्वारा भेदोपयोगित्वं वक्ष्यते । प्रकृते तु विध्युत्तारणेऽपि विधेर्ग्रहणसङ्क्रान्ततया पारिशेष्याभावेन प्रकरणान्तरन्यायाविषयत्वात् ।

न च संज्ञया भेदः; संज्ञाया यागसामानाधिकरण्याभावेन तद्भेदकत्वात् । अत एव ग्रहणसामानाधिकरण्यात् तद्भेदकत्वमुपांश्वन्तर्यामाद्यपेक्षया इष्टमेव । ऐन्द्रवायवाद्यपेक्षया तु भेदो देवतारूपगुणादधिगन्तव्यः । संज्ञात्वं च ग्रहणस्य ग्राह्यसंस्कारत्वप्रसिद्धेः ज्योतिष्टोमाङ्गताबलेन तदीयसोमसंस्करार्थत्वप्रतीतेः शत्रर्थस्य प्राप्तत्वात्तत्प्रख्यन्यायेन । अतश्च स्ववाक्योपात्तकर्माभावेऽपि अध्याहारेण तदन्वयोपपत्तेः ग्रहणसंज्ञात्व अंश्वदाभ्यपदयोः नानुपपन्नमिति मूलानुयायिनः ।

---

२ तै. सं. ३-३-३-२.

वस्तुतस्तु उक्तविधया सोमाख्यद्रव्यपरत्वेनैवोपपत्तौ कर्म-कारकाध्याहारद्वितीयाभङ्गादौ प्रमाणाभावात् "यत्ते सोमादाभ्यं नाम जागृवि" इति मन्त्राददाभ्यशब्दस्य सोमपरत्वप्रतीतेश्च द्रव्यसंज्ञैवेयमिति न्यायसुधोक्तः पन्थाः युक्त इत्युत्पश्यामः ।

प्रयोजनं पूर्वपक्षे यथाशक्त्युपबन्धविषयत्वम्, अङ्गत्वात् । सिद्धान्ते प्रधानत्वान्नेति ध्येयम् ।

सूत्रं तु द्रव्यपदलक्षितदेवताया यागाङ्गत्वाभावात् केवले अनारभ्याधीतेऽपि अस्मिन् ग्रहणमेव कर्मशेषस्स्यात्, दूरस्थस्यापि यागस्य देवतासम्बन्धोपपादकत्वोपपत्तेरिति व्याख्येयम् ।

इति नवममंश्वदाभ्याधिकरणम् ॥

अथ दशमं चयनाधिकरणम् ॥ (१०) ॥

सू—अग्निस्तु लिङ्गदर्शनात् क्रतुशब्दः प्रतीयेत ॥ २–३–२१. ॥ (पू) ॥

(विषयसंशयौ)

अनारभ्यैव श्रुतम्—"य एवं विद्वानग्निं चिनुते" इति । तथा 'अथातोऽग्निमग्निष्टोमेनानुयजन्ति, तमुक्थ्येन, तमतिरात्रेण, तं षोडशिना तं द्विरात्रेणे'त्यादि एकादशरात्रान्तम् । तत्र चिनोतिः लक्षणया यागान्तरविधायकः ? अथ वा चयनविधायकः ? इति विचार्यते । तत्र अग्निपदवाच्यः शुद्धोऽग्निः न तावत् चयनेनोत्पाद्यत इति न तज्जनकत्वेन चयनविधिर्युक्तः, चयनसंस्कृतलौकिकाग्नेश्च भूतभाव्युपयोगाभावात् न चयनसंस्कार्यत्वत् ।

(पूर्वपक्षः)

न चाग्निशब्दस्य निरूढलक्षणयाऽऽहवनीयादिपरत्वमङ्गीकृत्य तदुद्देशेन चयनविधिः । आहवनीयस्याऽऽधानैकजन्यत्वेन चयनजन्यत्वस्य तावदसम्भवात् । अन्यथा चयनवाक्यस्थाग्निशब्देनाऽऽहवनीयादौ निरूढलक्षणायामपि प्रमाणाभावात् । आधानप्रकरण एव हि अग्निपदस्य आहवनीयादिपदसमभिव्याहारात् निरूढलक्षणा समाश्रिता । अतश्च धर्मिग्राहकप्रमाणेनाहवनीयादेराधानैकजन्यत्वात् न चयनजन्यत्वसम्भवः । नापि चयनसम्पादितस्थण्डिलाधारत्वसम्बन्धेन संस्कार्यत्वम्, तथा सम्भवेऽपि चयनस्य 'इष्टकाभिरग्निं चिनुते' इति वचनेन प्राप्तस्याविधेयत्वात् । यद्यपि च तत्र गुणमात्रविधानमङ्गीकृत्येह चयनोत्पत्तिरिष्येत, तथापि उत्तरवाक्येषु अनुयजनप्रतियोगित्वरूपस्य गुणस्य यागमन्तरेणानुपपद्यमानस्य श्रवणात् तदनुरोधेन चिनोतेरपि लक्षणया यागपरत्वनिश्चयः । तथा हि—

'अथातोऽग्नि'मित्यत्राग्निमिति द्वितीया न कर्मकारकपरा, अपि तु (१)'अनुर्लक्षण' इति सूत्रात् काललक्षणार्थस्यानोः कर्मप्रवचनीयसंज्ञत्वात् तद्योगनिमित्ता । अतश्च अग्निष्टोमादिवृत्त्यनुयजनप्रतियोगित्वं तत्पूर्वभावित्वलक्षणं द्वितीयार्थः । तस्य च 'देवदत्तमनुगच्छति यज्ञदत्त' इत्यादौ तुल्यक्रियावृत्तित्वाविनाभावादग्निपदस्य यागपरत्वं गम्यते । अस्ति चाऽऽहवनीयप्राप्त्या तत्प्रख्यन्यायः । एवं च विशिष्टविधिगौरवपरिहारार्थमग्निसंज्ञकयागप्राप्त्यालोचने क्रियमाणे विद्वद्वाक्यमेवानन्याक्षिप्तशक्तित्वाद्यागविधायित्वेन निश्चीयते ।

अत एव तत्रत्यचिनोतिः इष्टकावाक्यप्राप्तचयनानुवादक-

---

१. पा. सू. १-४-८४.

स्सन् यागलक्षकः । तस्य च फलापेक्षायां "पुरस्तादुपसदां प्रवर्ग्येण प्रवृणक्ति" इतिवत् कालविधिपरेणापि 'अथात' इति वाक्येन अर्थात् कृत्स्नाङ्गत्वसिद्धेः 'ऋध्नोत्येवे'ति फलश्रवणमर्थवादः । अङ्गापेक्षायां च अव्यक्तत्वात्सोमादतिदेशकल्पनम् । अतश्च सिद्धं वाक्यान्तरोपात्तात् अनुयजनप्रतियोगित्वरूपात् गुणात् यागान्तरत्वम् ।

(सङ्गतिः)

अत एव पादाध्यायसङ्गतिरपि । अनुयजनप्रतियोगित्वस्य च वक्ष्यमाणरीत्या सिद्धान्तेऽविधेयत्वात् संदिग्धविधेयताकत्वम् । अनन्तरा तु वाक्यान्तरोपात्तो देवतारूपो गुणो ग्रहणेऽपि सम्भवान्न भेदको यागस्य । अयं तु चयनेऽनिविशमानत्वात् भेदक एवेति पूर्वपक्षोत्थानात् द्रष्टव्या ।

यत्तु वार्तिकेऽग्निशब्दस्य 'अथात' इत्यादिवाक्ये 'अग्निं यजती'ति यागसामानाधिकरण्यात् यागनामधेयत्वावगमात् उत्पत्तिवाक्येऽपि चिनोतेर्यागपरत्वं, 'अथात' इत्यादिवाक्येषु तु तद्यागानुवादेनाग्निष्टोमादिसंस्था द्विरात्रादिकालाश्च वैकल्पिका विधीयन्ते, तत्रत्यानुशब्दश्च(१)"एष वाव प्रथमो यज्ञो यज्ञानां" इत्यनेन प्राप्तज्योतिष्टोमोत्तरकालतानुवादः । उक्थ्यादिवाक्येषु च यजतिपदस्यैवानुषङ्गः, नानुशब्दस्य । यागस्य च ऋद्धिः फलं रात्रिसत्रवदिति पक्षान्तरमुक्तम्, तत् गुणप्रमाणकभेदाभावेन असङ्गतिप्रसङ्गात् अग्निपदस्य रूढस्य सामानाधिकरण्यमात्रेण नामधेयत्वायोगात् सामानाधिकरण्यस्य चाग्निशब्दस्य अनुशब्दयोगनिमित्तद्वितीयान्तत्वेन दुरुपपादत्वात्, अन्यथा अनुशब्दस्य सापेक्षत्वापत्तेः उपेक्षितम् ।

---

१. ता. ब्रा. १६-१-२.

तस्मात् पूर्वोक्तविधयैव यागविधिः । एवं च "अग्नेः स्तोत्र" "मग्नेश्शस्त्रं" "चितयस्य षडुपसदो भवन्ती"त्यादिलिङ्गदर्शनमप्युपपन्नं भवति । अन्यथा चयनस्यापूर्वत्वेन स्तोत्राद्यभावात् लिङ्गदर्शनानुपपत्तिः । सूत्रं स्पष्टम् ।

(सिद्धान्तः)

सू—द्रव्यं वा स्याच्चोदनायास्तदर्थत्वात् ॥ २—३—२२. ॥ (सि)

अग्निशब्दस्य निरूढलक्षणयाऽऽहवनीयादिपरत्वात् तत्संस्कारकत्वेनैव स्वानिष्पाद्यस्थण्डिलाधारत्वसम्बन्धेन यथाश्रुतचयनविध्युपपत्तौ उभयोरप्यश्रुतयागपरत्वकल्पने इष्टकावाक्यस्य च विशिष्टविधिपरत्वकल्पने प्रमाणाभावः ।

न चानुयजनप्रतियोगित्वस्य यागपरत्वं विनानुपपत्तिः, 'पाकमनुभुङ्क्ते' इत्यादौ विजातीयक्रियास्थलेऽपि तद्दर्शनात्।देवदत्तमनुगच्छतीत्यादौ तु क्रियान्तरानुपादानादुपस्थितत्वात् गमनस्यैव प्रतीतिः । प्रकृते तु चयनक्रियाया एव प्रकृतत्वात्तामादायैवानुशब्दोपपत्तिः । अत एव चयनोत्पत्तिवाक्ये आहवनीयादेस्संस्कार्यत्वावगमेऽपि आधानवदनुत्पाद्यत्वेन स्वरूपे आनर्थक्यात् 'अग्निं संमार्ष्टी' तिवदुपयोगापेक्षायां प्रकरणाभावेऽपि 'अथात' इत्यादिवाक्यैः अग्निष्टोमसंस्थाकज्योतिष्टोमाद्यङ्गत्वेन चयनं विधीयते । अत एव तत्र चयनस्य शाब्दत्वासिद्ध्यर्थं तत्राग्निपदेन चयनसंस्कृताग्निलक्षणा चयनमात्रलक्षणा वा अभ्युपगम्यते । उत्पत्तिवाक्ये चोपयोक्ष्यमाणाहवनीयाधारभूतस्थलनिष्पादकत्वावगमात् तस्य च पूर्वकालं विना अनुपपत्तेः उप-

साहिनान्तरत्वस्य प्रमाणान्तरसिद्धत्वाच्च अनुशब्दोऽनुवादः । अग्निष्टोमशब्दस्य च जातिशक्तिन्यायेन संस्थावाचकस्यापि व्यक्तिन्यायेन स्वसम्बन्धिक्रतूपस्थापकत्वात् "प्रकृतौ वा द्विरुक्तत्वा"दिति न्यायात् ज्योतिष्टोम एव प्रचुरप्रयोगाद्वा तदुपस्थापकत्वोपपत्तेः तदुद्देशेन चयनं विधीयते, अग्निष्टोमसंस्थाकत्वविशिष्टज्योतिष्टोमत्वस्य च अग्निष्टोमपदशक्यतावच्छेदकस्य उद्देश्यतावच्छेदकत्वात् नाग्निष्टोमसंस्थाकत्वरूपविशेषणाविवक्षा ।

अथवा लाघवेन ज्योतिष्टोमत्वस्यैव वा उद्देश्यतावच्छेदकत्वकल्पनात् तदविवक्षायामपि न दोषः । यजतिश्च साधुत्वार्थमनुवादः । अथातश्शब्दावपि प्राप्तार्थत्वात् केवलं ज्योतिष्टोमोद्देशेन चयनमात्रमथात इत्यत्र आद्येन वाक्येन विधीयते ।

अत्र च ज्योतिष्टोमप्रयोगसंवलितत्वाच्चयनप्रयोगस्य अनुष्ठानसादृश्यात् ज्योतिष्टोमाङ्गत्वप्रसक्तावपि "पशुकामश्चिन्वीते"ति वाक्यैः चयनस्य काम्यत्वावगमात् न तदङ्गत्वम् । चयनस्य हि पश्वर्थत्वे क्रियारूपत्वेन च आश्रयापेक्षाभावेऽपि चिनोतेः सकर्मकत्वात् उत्पत्तिवाक्यावगताग्निकर्मत्वावगतेः आहवनीयसंस्कारकस्य चयनस्य पश्वर्थत्वानवगमात् तस्य चोपयोगापेक्षायां येष्वाहवनीय औपदेशिकप्रक्षेपद्वारा प्राप्तस्तत्प्रयोगान्तःपातावगमेऽपि ज्योतिष्टोमप्रयोगसंवलितत्वाच्चयनप्रयोगस्य तत्प्रयोगान्तःपातः सुलभ एव । तत्र च अप्राप्ताङ्गत्वासिद्ध्यर्थमयं विधिरर्थवानेव ।

अत एव निर्ज्ञातप्रयोजनत्वात् कालार्थ एवायं संयोगः इत्यपास्तम् । कालस्य प्राप्तत्वेन अविधेयत्वात् । न च ज्योतिष्टोमस्य प्राकरणिकोत्तरवेद्यवरोधात् एतस्य वचनस्य त्रिवृदग्निष्टोमाभिप्रायत्वं शंक्यम् । अग्निष्टोमपदस्य प्रचुरप्रयोगेण ज्यो-

तिष्टोम एव शक्ततया एतस्यापि निरवकाशत्वात् । "नोत्तरवेदिषु क्रतुषु चिन्वीत, उत्तरवेद्या ँ ह्यग्निश्चीयते" इति वचनेन अग्न्युत्तरवेद्योः समुच्चयविधानेनाविरोधाच्च । इदं हि वचनं चयननिष्पाद्यस्थण्डिलाधारत्वेन निरवकाशत्वात, सिद्धवन्निर्देशान्यथानुपपत्तिकल्पितेन विधिना उत्तरवेदिं विदधत् समुच्चय फलति । दाशमिकी अग्नेर्विकल्पोक्तिस्तु नोत्तरवेदिप्रतियोगित्वविषयिणी, अपि तु स्वाभावप्रतियोगित्वविषयिणी । तत्प्रमाणं च सते समारोपकालविधिपरे वाक्ये 'यदग्निं चेष्यमाणा भवन्ती' ति सिद्धवत्पाक्षिकानुवाद इति तत्रैव वक्ष्यते ।

नचैवं चयनमात्रमिव उत्तरवेदिमात्रमपि ज्योतिष्टोमे कदापि न स्यादिति वाच्यम् । 'उत्तरवेद्यामग्निं निदधाती'ति वचनेन उत्तरवेदेः संयोगपृथक्त्वन्यायेन साक्षादग्निधारणार्थत्वेनापि विनियोगात् । इदं हि वचनं न परम्परासम्बन्धेन आधारविधानपरम्, चयनाधारत्वविधिबलेनैव तत्सिद्धेः । अपि तु चयनाभावपक्षे साक्षादाहवनीयाधारविधिपरम् । यद्यपि एतद्विधिविधेयस्य साक्षादाधारत्वस्य प्राकरणिकत्वात् तदवरोधे चयननिष्पाद्यस्थण्डिलानिवेश इति शक्यते वक्तुम् , तथाप्यग्निष्टोमपदस्य प्रचुरप्रयोगेण ज्योतिष्टोम एव शक्ततया निरवकाशत्वात् न कोऽपि विरोधः; अत एव बौधायनकल्पादौ 'अग्निष्टोमेन यक्ष्यमाणो भवति, 'सन्तिष्ठतेऽग्निष्टोम'इत्युपक्रमोपसंहाराभ्यां दीक्षणीयाद्यङ्गाम्नानं सङ्गच्छते। अन्यथा अग्निष्टोमशब्दस्य प्रकृतिविकृतिसाधारणाग्निष्टोमसंस्थक्रतुमात्रपरत्वे दीक्षणीयादीनामपि प्रकृतिविकृतिसाधारण्यापत्तेः अतिदेशविधेः तदीयस्यानुपपत्तेः । अतो ऽग्निष्टोमादिपदानां पार्थपदस्येवार्जुने ज्योतिष्टोम एव प्रचुरप्रयोगात् तत्परतया निरवकाशत्वम् ।

नचैवं अग्नेः उत्तरवेद्या समुच्चये भिन्नकार्यत्वापत्तेः उत्तरवेदिकार्यापत्त्या तदीयधर्मप्राप्तिः संकर्षे वक्ष्यमाणा विरुध्येतेति वाच्यम्। उत्तरवेदेः संयोगपृथक्त्वन्यायेन कार्यद्वयावगमात् तद्धर्माणामपि कार्यद्वयप्रयुक्तत्वावगतेः चयननिष्पादितस्थण्डिलस्य साक्षादग्निधारणरूपकार्यार्थत्वेन तदंशे उत्तरवेदिकार्यापन्नत्वात् तद्धर्मप्राप्त्युपपत्तेः। अतएव कार्यान्तरांशे समुच्चीयमानोत्तरवेद्यामपि धर्मा भवन्त्येव। तत्राविरुद्धेषु तन्त्रता, विरुद्धेषु तु आवृत्तिरित्यन्यदेतत्। सर्वथा ज्योतिष्टोमोद्देशेन चयनविनियोगविधिरिति सिद्धम्।

अत एवानुशब्दोक्तकालयोगेऽपि चयनसंक्रान्तत्वात् विधेः अदाभ्यवाक्यवदेव न ज्योतिष्टोमान्तरत्वशङ्का, ज्योतिष्टोमातिदेशेनैव सर्वविकृतिषु चयनप्राप्तिवत् द्विरात्रादिष्वपि प्राप्तिसिद्धावपि तेषु पुनर्वचनं चयनाश्रितगुणकामानां "श्येनचितं चिन्वीत स्वर्गकाम" इत्यादीनां प्राप्त्यर्थमिति(१) दशमे वक्ष्यते। गुणकामानां हि आष्टमिकन्यायेन प्रणयनवत् लौकिकचयनस्याश्रयत्वव्यावृत्त्यर्थं चयने अपूर्वीयत्वविवक्षावश्यंभावे ज्योतिष्टोमप्रकरणाभावेऽपि 'अथात' इति वाक्येन ज्योतिष्टोमस्यैवोपस्थितत्वात् तदपूर्वसाधनीभूतचयनस्यैवाश्रयत्वापत्तेः तस्य विकृतौ प्राप्त्यभावेन ज्योतिष्टोमतुल्योपस्थितिसंपादनद्वारा तत्तदपूर्वसाधनीभूतचयनस्य तत्तद्विकृतिष्वपि कासुचिदा(२)श्रयप्राप्त्यर्थं चयनपुनर्विधानं युज्यते।

अत एव अतिरात्रादिपदानां प्रचुरप्रयोगात् तत्तत्संस्थाकज्योतिष्टोमवाचिनामपि ज्योतिष्टोमे चयनस्य पूर्ववाक्यादेव सिद्धेः तदाश्रितफलार्थं संस्थास्वपि चयनोपदेशस्य श्येनचित्यादिगुणकामानां संस्थाश्रयभूतज्योतिष्टोमसंबन्धिचयनोपदेशेनैव प्रा-

१. १०-९-११. २. तत्प्राप्त्यर्थं

प्तिसंभवेन व्यर्थत्वात् अगत्या तत्तत्संस्थाकविकृतिलक्षकत्वं नानुपपन्नम् ।

एवं गुणकामप्राप्तिरूपप्रयोजनसत्त्वे ऽपि प्रकृतावग्नेरुक्तलिङ्गवशेना"ग्निः सोमाङ्गं वच्छता"मिति ज्योतिष्टोमप्रकरणस्थकात्यायनवचनेन च पाक्षिकत्वावगमात् सर्वविकृतिष्वपि तथैव प्राप्तेः 'यत्रमयश्चरुर्भवति' 'उत्तरेऽहन् द्विरात्रस्य गृह्णत' इत्यादिवदुक्थ्यादिषु कासुचिद्विकृतिषु पुनःश्रवणं नियमफलकमिति प्रयोजनान्तरमपि ज्ञेयम् ।

न च चयनप्रकरणस्थगुणकामप्राप्तिफलकत्वे संभवति दूरस्थतत्तद्विकृतिविधेयकतापन्नातिदेशप्रमाणकाग्निपाक्षिकत्वोपस्थितिसापेक्षनियमफलकत्वकल्पनानुपपत्तिरिति वाच्यम् । तत्तद्विकृतित्वावच्छेदकावच्छेदेन अग्निविधौ नियमस्यार्थसिद्धत्वेनाकल्पनीयत्वात् । अतिदेशोपस्थितिं विना अग्निविधिगतवैयर्थ्यप्रतिसन्धानाभावेन गुणकामप्राप्तेरपि प्रयोजनत्वाकल्पनाच्च । अतिदेशोपस्थितौ च झटिति तद्बोधितपाक्षिकत्वस्यैव उपस्थितौ नियमस्यैव फलत्वौचित्याच्च ।

नचैवं क्लृप्तोपकाराग्निपुनःश्रवणात् गृहमेधीयाज्यभागन्यायेनाङ्गान्तरपरिसंख्याफलकत्वस्याप्यापत्तिः । तद्वदिहापि अतिदेशाधीनप्राप्तिकाहवनीयप्राप्त्युपजीवकत्वेन अतिदेश(१)बाधकत्वानुपपत्तेः, द्विरात्रादिष्वतिदेशप्राप्ताङ्गविषयलिङ्गसद्भावाच्च । अतः परिसंख्याफलकत्वासंभवेऽप्युक्तरूपोभयफलकत्वेन काचिदनुपपत्तिः । तन्त्ररत्नादौ तु नियमफलकत्वाङ्गीकारे बीजं न पश्यामः ।

---

(१) लोपकत्वा

न चैकस्य फलद्वयसंकरो दोषाय। "उत्तरेऽहन्द्विरात्रस्य गृह्यते, मध्यमेऽहंस्त्रिरात्रस्य, चतुर्थे चतुर्थेऽहन्यहीनस्ये"त्यादौ बहुशस्तथा दृष्टत्वात्। तथा हि—

ज्योतिष्टोमप्रकरणे 'य एवं विद्वान् षोडशिनं गृह्णाति' इत्यनेन षोडशिसंज्ञकं ग्रहणमाम्नातं ज्योतिष्टोमाङ्गम्। तस्य मान्त्रवर्णिकदेवताबलात् ऐन्द्रवायववादिवदेव यागाभ्यासोऽप्यर्थसिद्धः। "एकविंशो भवति प्रतिष्ठित्यै" इत्यनेन च तदङ्गत्वेन स्तोत्रं विहितम्। तदत्र षोडश्यादिशब्दा यथाग्रहणे प्रयुज्यन्ते तथा स्तोत्रेऽपि, 'एकविंशः षोडशी अग्निष्टोमसामे'त्यादिप्रयोगात्; संस्थावाचित्वञ्चैषां श्रुतिस्मृतिकल्पसूत्रादिषु प्रयोगात् स्पष्टमेव। संस्थाश्च संपूर्वकस्य तिष्ठतेः समाप्तिवाचित्वात् तत्तत्स्तोत्रैः क्रतोः समाप्तय उच्यन्ते। यद्यपि च ततः परमप्यङ्गानि प्रधानाभ्यासाश्च केचित् सन्त्येव, तथापि स्तोत्राणि न कानिचिदिति संस्थात्वाविघातः।

अत्र च षोडश्यादिशब्दानां प्रचुरप्रयोगात् संस्थास्वेव शक्तिः। न तु ग्रहणादौ। यद्यपि तत्तत्संस्थाकज्योतिष्टोमेऽपि प्रचुरप्रयोगोऽस्त्येव, तथापि नागृहीतविशेषणन्यायात् प्रचुरतया प्रयोगाच्च संस्थायामेव शक्तिः, ज्योतिष्टोमे तु निरूढलक्षणा, प्रचुरप्रयोगात्। क्रत्वन्तरे तु साम्प्रतिकी, क्वाचित्कप्रयोगात्। तत्र चेयं स्थितिः—वाचनिकाग्निष्टोमसंस्थायां नाग्निष्टोमस्तोत्रोत्तरं उक्थ्यादिकं किंचित्। उक्थ्यसंस्थायां तु तदुत्तरं उक्थ्यस्तोत्राणि, न तु तस्याप्युत्तरं षोडश्यादि। षोडशिसंस्थायां तु तदुत्तरं षोडशिस्तोत्रं, न तस्याप्युत्तरमतिरात्रादि। अतिरात्रसंस्थायां तु तेनैव समाप्तिरिति।

तत्र च षोडशिसंस्थायाः प्रकरणात् 'चतस्रः सोमसंस्थाः'

इति वचनाच्च ज्योतिष्टोमाङ्गत्वप्रसक्तौ "षोडशिना वीर्यकामः स्तुवीत" इति वचनेन ज्योतिष्टोमाश्रितायाः तस्याः फलोद्देशेन विधिः उक्थ्यातिरात्रयोरिव "पशुकाम उक्थ्यं गृह्णीयात्" "अतिरात्रेण प्रजाकामं याजयेत्" इति वचनाभ्याम् । नत्वग्निष्टोमसंस्थावत् क्रत्वङ्गत्वम् । अत्र च सर्वत्र संस्था एव फलोद्देशेन विधीयन्ते । न तु स्तोत्रादि, तत्तत्संस्थाकयागादिर्वा ; तत्र षोडश्यादिपदानां अशक्तत्वात् , लक्षणायां प्रमाणाभावाच्च । अतएवात्र स्तुवीतेत्यादिधातुः (१)निर्वपतिवत् अनुवाद एव ; अतश्च षोडशिनः काम्यत्वेऽपि क्रत्वङ्गतासिद्ध्यर्थं "अत्यग्निष्टोमे राजन्यस्य गृह्णीयात् , अप्युक्थ्ये" इति एतद्वचनद्वयं न विरुध्यते ।

अत्र हि नाग्निष्टोमादिसंस्थाङ्गत्वेन षोडशिसंस्थाविधिः, विरोधेन संस्थायाः संस्थाङ्गत्वासम्भवात् । अपि तु प्रतिप्रसवार्थापिशब्दस्वारस्यात् प्रकरणाच्च ज्योतिष्टोमाङ्गतयैव । अत एव तत्रत्यं अग्निष्टोमादिपदं लक्षणया तत्तद्ग्रहयज्ञाभ्यासपरम् , सप्तमी च सतिसप्तमी आनन्तर्यादिरूपकालपरा । अतश्च राजन्यकर्तृकत्वे निमित्ते ज्योतिष्टोमाङ्गतया अग्निष्टोमाभ्यासोत्तरकालविशिष्टषोडशिसंस्थाप्रयोगो विधीयते । अर्थाच्च तस्य तत्तत्संस्थानिवृत्तिः । ततश्च नित्याग्निष्टोमसंस्था काम्या चोक्थ्यसंस्था ब्राह्मणवैश्ययोरेव । काम्या तु षोडशिसंस्था सर्वेषामेवेति विवेकः । एतस्यैव चाग्निष्टोमस्तोत्रोत्तरकालीनस्य षो-

(१) 'सौर्यं चरु निर्वपेत्' 'आग्नेयमष्टाकपालं निर्वपेत्' इत्यादौ श्रुतो निर्वपतिशब्दो यथा तत्र द्रव्यदेवतासम्बन्धान्यथानुपपत्त्या यागे कल्पिते, तत्साधनीभूते द्रव्येऽर्थाक्षिप्तस्य समुदायात् पृथक्करणरूपस्य निर्वापस्यानुवादकः तद्वत् 'षोडशिना वीर्यकामः स्तुवीत' इत्यादौ संस्थासु विहितासु तदन्यथानुपपत्तिसिद्धस्तोत्राद्यनुवादकः स्तुवीत, गृह्णीयादित्यादिशब्द इत्यर्थः ।

डशिनोऽत्यग्निष्टोम इति संज्ञा। "अत्यग्निष्टोमे राजन्यस्य गृह्णीया" दिति शाखान्तरवचनात्।

यत्तु "अतिरात्रे ब्राह्मणस्य गृह्णीया"दिति वचनं तत् ब्राह्मणकर्तृकत्वे निमित्ते ऽतिरात्रसंस्थाकज्योतिष्टोमोद्देशेन षोडशिग्रहणविधायकं, न त्वतिरात्रसंस्थोद्देशेन, तस्याः प्राकृताङ्गैरेव निराकाङ्क्षत्वात्। नाप्यग्निष्टोम इतिवद्विधिः। अपिशब्दाभावात्। अनुषङ्गाङ्गीकारे उक्थ्यवाक्ये तत्पाठवैयर्थ्यात्। अतो यथोक्त एव वाक्यार्थः। तस्य च नित्यवत्प्राप्तौ "नातिरात्रे षोडशिनं गृह्णाती"त्यनेन पाक्षिकत्वसिद्ध्यर्थं निषेधोऽपि नानुपपन्नः। तेन ब्राह्मणस्य विकल्पः, अन्येषां नैवेति सिद्धम्।

यत्तु"अतिरात्रे षोडशिनं गृह्णाती"ति क्वचिल्लिख्यते वचनं तत् "अतिरात्रे ब्राह्मणस्ये" त्येतदेव ब्राह्मणपदत्यागेनेति वेदितव्यम्। गुणत्वेऽपि वा ब्राह्मणवाक्येनोपसंहार इत्यवधेयम्। अतश्च उत्तरेऽहन्नित्यादिवाक्येषु द्विरात्रोत्तराहस्यातिरात्रसंस्थाकत्वादतिदेशतो विकल्पेन प्राप्तस्य षोडशिग्रहणस्य नियमः ब्राह्मणनिमित्तकत्वेन प्राप्तस्यानैमित्तिकत्वसिद्धिद्वारा राजन्यवैश्ययोरपि तस्य प्राप्तिश्च पार्थसारथ्युक्त्या फलम्। अहीनादीनामहरन्तरेषु अतिरात्रसंस्थाकेषु षोडशिग्रहपरिसंख्या च फलम्। अत एव एकस्याहीनस्य एकमेव चतुर्थं वीप्सा त्वहीनान्तरमादाय, इति (१)दशमे वक्ष्यते। तेन सर्वत्रैव फलसाङ्कर्यस्येष्टत्वात् 'तमुक्थ्येने'त्यादावपि तत्सङ्कारो न दोषायेति सिद्धम्। सूत्रं स्पष्टम्।

सू—तत्संयोगात क्रतुस्तदाख्यः स्यात्तेन धर्मविधानानि २–३–२३.॥

(१) १०–५–१३.

यत्तु लिङ्गदर्शनं अग्निशब्दस्य यागपरत्वे उपन्यस्तम् 'अग्नेः शस्त्र'मित्यादि, तत्रत्याग्निशब्दस्य लक्षणया चयनसंपादितस्थण्डिलस्थापिताग्निसंपादितयागपरत्वेनाप्युपपत्तेरकिञ्चित्करम् । अत एव चयनप्रकरणेऽग्निशब्द उत्पत्तिवाक्यस्थाहवनीयपरः विनियोगवाक्यस्थश्चयनपरः "हिरण्यशकलैरग्निं प्रोक्षति" इत्यादिवाक्येषु अग्निस्थापनप्राग्भाविपदार्थविधायकेषु स्थलपरः, 'अग्नेः स्तोत्र'मित्यादिषु यागपर इति धर्मविधानोपपत्तिः ।

प्रयोजनम् सूत्रञ्च स्पष्टम् ।

इति दशमं चयनाधिकरणम् ।

अथैकादशं प्रकरणान्तराधिकरणम् (११) ॥

सू–प्रकरणान्तरे प्रयोजनान्यत्वम् ॥ २–३–२४.(सि)

तदेवं गुणप्रमाणकं भेदं सापवादं प्रसाध्याधुना क्रमप्राप्तः प्रकरणान्तराद्भेदो निरूप्यते ।

(विषयसंशयौ)

कुण्डपायिनामयने श्रूयते–"उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति, मासं दर्शपूर्णमासाभ्यां यजते, मासं वैश्वदेवेन, मासं वरुणप्रघासैः, मासं साकमेधेन, मासं शुनासीरीयेण" इति। तत्र किमेषु प्रसिद्धाग्निहोत्राद्यनुवादेन मासादिगुणविधिः ? उत मासादिविशिष्टकर्मान्तरविधिरिति विचार्यते ।

(सङ्गतिः)

अत्र च मासादेरनुपादेयस्य गुणस्य पूर्वपक्षे सिद्धान्ते वि-

धेयत्वे निश्चितेऽपि कृतिसाध्यत्वरूपोपादेयत्वेनानिश्चयात्, तादृग्गुणप्रयोज्यभेदनिरूपणेन पादाध्यायसङ्गतिः । दूरस्थस्यापि वचनस्याग्निष्टोमपदलक्ष्यज्योतिष्टोमाङ्गत्वेऽभिहिते सुतरामग्निहोत्रपदवाच्यपूर्वकर्माङ्गत्वं मासादेर्गुणस्य संभवतीति पूर्वपक्षोत्थानात् अनन्तरा ।

(पूर्वपक्षः)

तत्र धातोः पूर्वविहिताविहितसाधारणवाचकस्यापि पूर्वविहितमात्रवाचकेन नाम्ना समभिव्याहारात् पूर्वविहितकर्मोपस्थापकत्वोपपत्तेः न तावद्दूरस्थत्वमात्रेण कर्मान्तरविधायित्वशङ्का । न चैवमभ्यासाद्भेदोपपत्तिः, मासादिविधानार्थत्वेनान्यपरत्वात् । न च मासादेर्विधानायोग्यत्वम्, कर्त्रादिवत्कृतिसाध्यत्वेन रूपेण तदसंभवेऽपि कृत्यधिकरणत्वादिना तत्संभवात्, अन्यथा कालादेः विधिसंस्पर्शाभावेनाविवक्षाप्रसङ्गात् ।

नचैवमपि प्राकरणिकसायमादिकालाविरोधेन मासादिगुणस्य निवेशानुपपत्तेः गुणाद्भेदोपपत्तिः । सायंप्रातःकालस्य तावद्मावास्यापराह्णवद्व्याप्यव्यापकभावेनोपपत्तेः विरोधाभावात् ।

न चात्यन्तसंयोगवाचिद्वितीयान्तमासपदोपादिष्टसातत्येन विरोधः । आहाराद्यावश्यककार्यानुरोधेन सातत्यबाधावश्यंभावेन जातेष्टिन्यायेन प्राकरणिककालोपसङ्ग्रहस्यापि सिद्धान्त इवोपपत्तेः ।

न च जीवनाख्यनिमित्तेन तस्य विरोधः, सायमादिकालेनेव निमित्तस्य मासेनाप्यवच्छेदोपपत्तेः । अतश्च मासावच्छिन्नसायंप्रातःकालीनजीवनस्यैव निमित्तत्वात् तावद्भिः प्रयोगैरेकः प्रसवाधपरिहार इति सिद्ध्यति । काम्यप्रयोगे वा मासादिविधाना न कश्चिद्विरोधः ।

वस्तुतस्तु सत्यपि विरोधे मासस्य विशिष्यैव विहितत्वेन निरवकाशत्वात् अग्न्युत्तरवेद्योस्साक्षादग्न्याधारतायामिव विकल्पोपपत्तिः । अत एव दर्शपूर्णमासादौ पौर्णमास्यादिकालेन विरोधपरिहारासंभवेऽपि न दोषः ।

अस्तु वा मासादेर्जरामरणादिरूपनित्यप्रयोगविधिवदनुकल्पतया विधिः । अथ वा काण्डपायिनामयन एव दीक्षितत्वेन पर्युदस्तस्य निषिद्धस्य वाग्निहोत्रादेः मासं प्रतिप्रसवः । अथ वा अग्निहोत्राद्युद्देशेन मासकाले विहितेऽपि उद्देश्यत्वेन प्रकरणे उपस्थितानामग्निहोत्रादीनां निराकाङ्क्षाणामपि सत्रप्रयोगवचनेन फले विधानान्निसप्रयोगेणापि विरोधः ।

नचैवं 'द्वादशाहीनस्ये'त्यादावपि अहीनस्योद्देश्यत्वेनोपस्थितत्वाज्ज्योतिष्टोमप्रयोगविधिना फलेऽङ्गतया वा ग्रहणापत्तिः । संवत्सरपरिमितसत्रप्रयोगस्य षण्मासपरिमितसोमयागैः अपरिपूरणादाकाङ्क्षावशेन स्वतो निराकाङ्क्षाणामपि अग्निहोत्रादीनां फले विधानेऽपि अहीनादौ तदप्रसङ्गात् । अतो मासादिरूपस्य गुणस्य कालान्तरावरोधेऽपि निवेशोपपत्तेः न गुणाद्भेदः ।

न च प्राप्तकर्मानुवादेनोपसदां तदुत्तरकालत्वस्य मासस्य कर्तृबहुत्वस्य च विधौ वाक्यभेदापत्तेः तदापादकस्य गुणस्य भेदकत्वोपपत्तिः । कालविधेः प्रयोगविधित्वेन "पौर्णमास्यां पौर्णमास्या यजेते"त्यादौ कालत्रिकसाहित्यरूपानेकगुणविधिवदवाक्यभेदात् । "मासं दर्शपूर्णमासाभ्या"मित्यत्रोपसदुत्तरकालस्याश्रुतत्वेनाविधेयत्वाच्च ।

न च "उपसद्भिश्चरित्वा" इत्यस्यानुषङ्गसंभवः । उभयोरप्यनपेक्षितत्वेन तदसंभवात् । अतो न कर्मान्तरविधिरिति प्राप्ते—

(सिद्धान्तः)

अभीधीयते—सत्यं न प्रमाणान्तरमस्ति भेदकम् । तथापि अनुपादेयगुणयुक्तानुपस्थितिरूपं प्रकरणान्तरं समस्त्येव भेदकम् । तथा हि—

विधिस्तावदप्रवृत्तप्रवर्तनस्वभावः, प्रमाणत्वाच्चाज्ञातज्ञापनफल इत्यविवादम् । अतो विधेरज्ञातज्ञापनाविषयत्वापरपर्यायं विधेयत्वं, पुरुषप्रवृत्तिविषयत्वापरपर्यायञ्चोपादेयत्वं द्वयमपि ज्ञाप्यम्, तदपि सामानाधिकरण्येनेत्युत्सर्गः । तच्च पदश्रुत्या धात्वर्थ एवेत्यप्युत्सर्ग एव । योग्योपपदसद्भावे तु तदर्थवृत्ति इत्यपवादः । अत एव "यदाहवनीये जुहोती"त्यत्र विशिष्टविधिगौरवभिया पदश्रुत्युपात्तधात्वर्थस्य च भाव्यत्वलिप्सयोपादेयत्वं विधेयत्वं च सामानाधिकरण्येनाहवनीय एव बोध्यते । संभवति च तस्य वाजपेयाधिकरणोक्तरीत्या प्रणयनप्रादुष्करणादिरूपक्रियाविशिष्टत्वेन उपादेयता विधेयता च ।

अत एव तन्निर्वाहार्थं कर्मणः प्राप्त्यालोचनायां प्रापकविध्युपस्थापकप्रमाणान्तराभावेऽपि जुहोतिनैव कथंचिदुपस्थापनादुद्देश्यत्वाविघातः । यत्र तु न योग्यमुपपदं यथा मासमित्यादौ कालादेर्वाजपेयाधिकरणोक्तरीत्यैवोपादेयत्वाविषयत्वात्तत्रोपादेयत्वस्य पारिशेष्येण धात्वर्थमात्रवृत्तित्वात् सामानाधिकरण्यार्थं विधेयत्वमपि तद्गतमेव विधिरवबोधयति ।

एवं सत्यपि यदि 'सायं जुहोती' त्यादिवत् प्रत्यभिज्ञापकं प्रमाणं सान्निध्याद्यभविष्यत् ततोऽगत्या कालादौ विधेयत्वं कर्मणि चोपादेयत्वं इत्येवं वैयधिकरण्यमपि आश्रीयेत । सम्भवति हि कालादौ कृतिव्याप्यत्वरूपोपादेयत्वासम्भवेऽपि कृत्यधिकरणत्वादिना अज्ञातज्ञापनाविषयत्वाख्यं विधेयत्वम् । अत एव

च विधिसंस्पर्शाद्विवक्षा अङ्गत्वं च । न तु तदस्ति । अतस्सामानाधिकरण्यलाभार्थं विधेयत्वस्यापि धात्वार्थवृत्तितयैव बोधनात् विहितविधानायोगाद्भेदसिद्धिः ।

अत्र धात्वर्थे उपादेयत्वसामानाधिकरण्येन विधेयत्वबोधनं प्रकरणान्तरव्यापरः । तत्राप्यनुपादेयगुणान्वयस्य स्ववृत्त्युपादेयतापनयनद्वारा परिशेषाख्यप्रमाणसहकृतस्य धात्वर्थवृत्त्युपादेयतापादनं व्यापारः । प्रत्यभिज्ञापकप्रमाणस्य च सान्निध्यादेरुपादेयत्वविधेयत्वसामानाधिकरण्यप्रतिबन्धकत्वस्य वक्ष्यमाणत्वात् प्रत्यभिज्ञापकप्रमाणाभावरूपस्यासंनिधेरुक्तविधोपादेयत्वसामानाधिकरण्येन विधेयत्वबोधनं व्यापारः । एते एव च भवदेवादिग्रन्थे प्रयोगोत्पत्तिशब्दाभ्यामभिप्रेते ।

अत्र चोपादेयगुणाभाव एव प्रयोजकः, नत्वनुपादेयगुणान्वयोऽपि । गुणसामान्याभावेऽपि पारिशेष्येण धात्वर्थवृत्त्युपादेयतापादनोपपत्तेः। अत एव (१)दशमे गृहमेधीये "आज्यभागौ यजति" इत्यत्र कर्मान्तरत्वपूर्वपक्षे प्रकरणान्तरप्रमाणोपन्यासो युज्यते ।

नचैवं "तनूनपातं यजती" त्यादावपि तदापत्तेः कृतमभ्यासेनेति वाच्यम् । सत्यप्युपधेयसाङ्कर्ये न्यायस्वरूपस्यासाङ्कर्यात् । अभ्यासे हि उपादेयतामतन्त्रीकृत्य पारिशेष्येण धात्वर्थे विधेयत्वापादनमेव व्यापारः । अत एव तत्र सान्निधिः प्रतिबध्यः, न तु प्रकरणान्तर इव प्रतिबन्धकः । प्रकरणान्तरस्थले तु न पारिशेष्येण विधेयत्वापादनं व्यापारः, विशिष्टविधिविषया कालादेरपि विधेयत्वाङ्गीकरणेन तदसंभवात्, अपि तु सत्यपि विधेयान्तरे स्वापादितोपादेयतासामानाधिकरण्यलाभार्थं धा-

---

(१) १०-७-९.

त्वर्थेऽपि विधेयतापादनम्। अतो न्यायशरीरस्यासङ्कीर्णत्वाद्युक्तः प्रकरणान्तराद्भेदः।

ननु प्रकरणाद्यपेक्षयापि प्रबलस्य नाम्न एव सन्निधापकप्रमाणस्य सत्वात्सामानाधिकरण्यप्रतिबन्धकत्वोपपत्तेः कथं "मासमग्निहोत्रं जुहोति" इत्यत्रापि भेदसिद्धिरिति चेत्—

न; नाम्नः खण्डवाक्यार्थबोधदशायां लिङ्गसंख्याप्रकारकस्वार्थबोधकत्वेन तदप्रकारकधातुपदबोध्यधात्वर्थवृत्तिविधेयत्वस्य समानप्रकारत्वाभावेन नाम्ना प्रतिबद्धुमशक्यत्वात्। एवं हि सान्निधेर्धात्वर्थवृत्तिविधेयताप्रतिबन्धकत्वं यद्धातोः स्वविषयपरत्वप्रमापकत्वम्। धातोर्हि सन्निधिविषयीभूतपूर्वकर्मपरत्वे प्रमापिते विधेयार्थकत्वं प्रतिबध्यते। अतश्च सान्निधिना "अग्निहोत्रं जुहोति" इत्येतद्वाक्यगतजुहोतिपदबोध्यस्य लिङ्गसंख्यानन्वयिन एव होमविशेषत्वमात्रप्रकारतयोपस्थापितस्य 'सायं जुहोति' इत्येतद्वाक्यगतजुहोतिबोध्यत्वप्रमापणात् युक्ता तस्य तद्वाक्यगतजुहोतिवृत्तिविधेयार्थकत्वप्रतिबन्धकता। प्रकृते तु लिङ्गसंख्यान्वयिहोमविशेषत्वप्रकारतया नाम्नोपस्थापितस्य होमस्य 'मासमग्निहोत्रं जुहोति' इत्येतद्वाक्यगतजुहोतिना बाधयितुमशक्यत्वेन न नाम्नस्तद्वृत्तिविधेयतार्थकत्वप्रतिबन्धकत्वोपपत्तिः।

वस्तुतस्तु न नाम्नो विजातीयहोमत्वप्रकारकबोधजनकतापि, तथात्वे जुहोतिपर्यायत्वेन समप्रयोगानापत्तेः। अपित्वग्निदेवताकहोमत्वेनैव। अतिप्रसङ्गस्य प्राचीनप्रयोगाभावेनैवोद्भिदधिकरणे स्थापितत्वेन योगरूढयनङ्गीकाराच्च। अन्यथा मत्वर्थलक्षणादिभिया अतिप्रसङ्गभङ्गार्थमपि रूढ्यङ्गीकारे सोमादावपि तदापत्तेः। अतस्समानप्रकारत्वाभावान्न नाम्नो धात्वर्थवृत्तिविधेयत्वप्रतिबन्धकता।

अस्तु वा विजातीयहोमत्वप्रकारकबोधजनकता नाम्नः, तथापि तज्जन्योपस्थितेर्नामातिदेशविधया भेदानुगुणत्वेऽप्युपपद्यमानत्वान्न तद्बाधप्रतिबन्धकता । अत एव यत्र नाख्यातेन भेदबोधः तत्र नाम्नः पूर्वकर्मोपस्थापकत्वमाख्यातसमानाधिकरणत्वादिष्टमेव ।

अत एव यत्र श्रुतायां अनुमितायां वा भावनायां विधेयधात्वर्थश्रवणाभावेन नामार्थस्यैव करणत्वेनान्वयः तत्र नाम्नः पूर्वकर्मोपस्थापकत्वात्तस्यैव वैयधिकरण्यमाश्रित्य फलादिसंबन्धविधिः यथा—"यज्ञेन दानेन तपसाऽनाशकेन विविदिषन्ति" । "सर्वेभ्यो ज्योतिष्टोम"इति च । अत्र हि प्रत्ययोपात्तानां तत्तद्यज्ञाधिकरणकभावनानामेव ज्ञानाख्येन विविदिषाख्येन वा फलेन संबन्धो, न तु यज्ञान्तरस्य भावनान्तरस्य वा । यज्ञादिपदैस्सुबन्तैस्तत्तद्यागादीनामुपस्थितत्वात् ।

ननु—यज्ञादिपदस्य सुबन्तत्वेऽपि 'मासं जुहोति' इतिवत् पूर्वविहिताविहितसाधारण्येन यज्ञमात्रवाचित्वान्नियमेन पूर्वकर्मानुपस्थितेः कर्मान्तरत्वोपपत्तिः । न च रूपाभावः । अव्यक्तत्वादिसादृश्येन ज्योतिष्टोमान्तरविध्यन्तरोपपत्तिरिति चेत्—

विविदिषादिफलापेक्षितचित्तशुद्धिरूपद्वारसमर्पके "स ह वा आत्मयाजी यो वेदेदमनेनाङ्गं संस्क्रियते इदमनेनाङ्गमुपचीयते" इति वचने एतच्छब्देन पूर्वविहितयज्ञादिपरामर्शात्तदनुरोधेन द्वारसमर्पके विविदिषावाक्येऽपि यज्ञादिपदेन पूर्वविहितयज्ञादिपरामर्शोपपत्तेः ।

न च "अथैष ज्योति" रितिवदेतच्छब्दस्यापि पूर्वविहिताविहितसाधारण्यम् । "स यदेव यजेते" ति पूर्ववाक्ये यच्छब्दोपबन्धेन "य इष्ट्या पशुने" तिवद्याजिना पूर्वविहितकर्ममात्रपराम-

र्शात् तदनुरोधेनैतच्छब्दस्यापि पूर्वविहितकर्ममात्रपरामर्शकत्वोपपत्तेः। अतश्च तात्पर्यग्राहकसत्त्वाद्यज्ञादिपदस्य पूर्वकर्मोपस्थापकत्वोपपत्तेर्न कर्मान्तरत्वापत्तिः।

न च यज्ञाद्यभेदेऽपि भावनोपस्थापकाभावात्तद्भेदोपपत्तिः। "सर्वेभ्यो दर्शपूर्णमासा" वित्यादिवद्यज्ञादेरेव स्वसम्बन्ध्यव्यभिचरितभावनोपस्थापकत्वोपपत्तेः।

न च फलभेदाद्भावनाभेदः, प्रमाणाभावात्। अत एव "भिद्यते भावनामात्र" मित्यादिवार्तिकोक्तिः प्रौढिमात्रमेव।

नचैवमनेकासां भावनानां विधानाद्वाक्यभेदाशङ्का, एकप्रत्ययोपादानेन "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते" तिवत् तदनापत्तेः। तासां च तत्तद्यज्ञादिकरणत्वं प्राप्तमेवेति यज्ञादिपदमनुवादो भावनान्तरत्वप्रतिबन्धार्थः। विविदिषाफलसम्बन्धेन विनियोगमात्रकरणाच्च एकपदोपादानेऽपि "य इष्ट्वे" तिवत् नैकप्रयोगता।

तदेवमुक्तप्रकारेणैकवाक्यत्वसम्भवेऽपि 'विविदिषन्ती' त्यस्यानुषङ्गेण वाक्यभेदाङ्गीकरणं 'अर्धमन्तर्वेदि मिनोति' इतिवच्च कर्मसामान्यलक्षणामङ्गीकृत्यैकवाक्यत्वोपपादनं पितामहानामभ्युपेत्यवादमात्रम्। 'सर्वेभ्यो ज्योतिष्टोम' इत्यत्रापि भवदेवोक्तविधया अनारभ्याधीतत्वेऽपि नाम्नः पूर्वकर्मोपस्थापकत्वोपपत्तेर्न तावद्यागभेदः। तेनैव स्वाव्यभिचरितभावनोपस्थितिसम्भवान्न तद्भेदोऽपि। श्रुतवाक्यनिर्वाहार्थन्तु अश्रुतकर्तव्यपदाध्याहार इति विशेषः। वस्तुतस्तु प्राकरणिकत्वादेव सूत्रोक्तादकर्मान्तरम्।

एवं यत्र गवामयनादौ "चत्वारोऽभिप्लवाः षडहाः पृष्ठ्यष्षडह" इत्यादि वचनैर्यागान् विधाय पुनः प्रकरणान्तरे

तादृशैरेव वचनैः श्रूयन्ते तत्र मत्यप्यप्राप्तोपादेयगुणाभावसहकृतासन्निधौ नाम्नैव पूर्वयागानां तैश्च भावनानामुपस्थितत्वान्न कर्मान्तरत्वम् । न चैवमभ्यासाद्भेदशङ्कयः । "यं कामं कामयते तमेतेनाप्नोती"ति सन्निधिपठितवाक्यान्तरप्रमितफलसम्बन्धार्थत्वेनान्यपरत्वाभावात् । अतश्च तस्यैव कर्मणो गवामयनप्रकरणपाठात्तदीयफलसम्बन्धः । प्रकरणान्तरपाठाच्च फलान्तरसम्बन्ध इति वेदितव्यम् ।

यदि तु नामातिदेशादिव्यवहारसिध्यर्थं भेदावश्यकता ततः क्वोत्पत्तिपरत्वं क्व वा फलसम्बन्धार्थं पुनः श्रवणमिति विनिगमनाविरहरूपाभ्यासादेवोभयत्राप्युत्पत्तिविधित्वमङ्गीकृत्य भेदः प्रसाध्यः ॥

एवं द्वादशाहप्रकरणस्थे 'प्रायणीयोऽतिरात्र' इति वचने विहितस्यातिरात्रसंस्थाकप्रायणीयस्य गवामयनप्रकरणस्थेन "वैश्वानरो ज्योतिष्टोमः प्रायणीयमहर्भवति" इति वाक्येन विधेयगुणाभावात् तस्मिन्नपि वाक्ये कर्मान्तरमेव विधेयम् । वैश्वानरपदं हि वाक्यान्तरेण वैश्वानरदेवत्यग्रहस्य प्राप्तत्वान्नामधेयमेव । ज्योतिष्टोमपदस्य द्वादशाहे ज्योतिष्टोमधर्मकत्वस्य चोदनालिङ्गातिदेशेनैव प्राप्तत्वादविधेयार्थकत्वम् । अतश्च विधेयान्तराभावात् कर्मान्तरविधिरेवायम् ।

न चैतद्वाक्यविहितकर्मानुवादेन द्वादशाहिकवाक्ये अतिरात्रसंस्थामात्रविधानोपपत्तेः कथं कर्मान्तरत्वमिति वाच्यम् । गवामयनप्रकरणेऽपि प्रथमेऽहन्यतिरात्रसंस्थाविधेः पार्थक्येन सत्वात् । अतोऽत्रापि विनिगमनाविरहादेव कर्मान्तरत्वम् । भाव्यकारीयप्रकरणान्तरन्यायेन भेदोक्तिस्तु अप्राप्तोपादेयगुणाभावविशिष्टासन्निधिमात्रेण व्याख्येया ।

एवं "वारुण्या निष्कासेन तुषैश्चावभृथं यन्ती" इत्यत्रापि प्रकरणान्तरात् भेदोक्तिः सन्निधिविरहमात्रेणैव, न तु वस्तुतः प्रकरणान्तरन्यायोऽस्ति। उपादेयगुणाभावाभावात्, अवभृथपदेनाख्यातसमानाधिकरणेन सौमिकावभृथस्यैवोपस्थितत्वाच्च । भेदस्तु तत्र प्राप्तकर्मानुवादेनानेकगुणविधाने वाक्यभेदापत्तेर्गुणादेव। यद्यपि चात्र निष्कासस्य करणत्वेन श्रुतस्यापि प्रयाजशेषवत् संस्कार्यत्वं कल्प्येत तथापि प्राप्तकर्मानुवादेन तुषाख्यद्रव्यसम्बन्धसंस्कार्यसम्बन्धश्चेति(१) इन्द्रियकामाधिकरणोक्तरीत्या वाक्यभेदप्रसङ्गात् कर्मान्तरम्।

अत्र हि निष्कासस्य प्रयाजशेषवत् संस्कार्यत्वेऽपि न तुषाणां प्रकृतपुरोडाशानुनिष्पन्नानामपि संस्कार्यत्व न्यायसुधोक्तं युक्तम्। तथात्वे कर्मान्तरविधानेऽपि उद्देश्यानेकत्वनिमित्तवाक्यभेदस्यापरिहार्यत्वात्। नचोभयोरपि उपयोगित्वाविशेषात् विनिगमनाविरहः, तुषपदस्य जाघनीपदवद्वयवाविशेषवाचित्वेऽपि उत्तरार्धादिपदवत् ससम्बन्धिकवचनत्वाभावेन लौकिकतुषपरत्वोपपत्तौ विहितप्रतिपत्तिकपुरोडाशीयतुषग्रहणे प्रमाणाभावात्। अत एव बौधयनीयकल्पे लौकिकतुषग्रहणमवोपादिष्टम्। निष्कासपदस्य ससम्बन्धिवचनत्वात् 'वारुण्या' इत्यनेन विशेषणाच्च अर्थकर्मत्ववादिमतेऽपि च परप्रयुक्तद्रव्योपजीवित्वस्यावश्यकत्वेन लौकिकनिष्कासग्रहणानुपपत्तेरुपयुक्तस्य निष्कासस्यैव तेन ग्रहणात् प्रयाजशेषन्यायेन युक्तं संस्कार्यत्वम्।

नाचातिदेशकप्रातिपत्त्यन्तरानिराकाङ्क्षस्य प्रयाजशेषन्यायाविषयत्वासम्भवः। अर्थकर्मत्वपक्षेऽपि निष्कासांशे आतिदेशिकप्रतिपत्तिबाधस्यावश्यकत्वात्। प्रयाजशेषस्यापि सर्वहोमसम्भवेना

---

१ पू० मी० २ २-११.

नपेक्षस्यैव प्रतिपत्तिविधानाच्च । अतो निष्कासस्संस्कारार्थत्वेनात्र-भृथविधानात् प्राप्तावभृथानुवादेन च द्रव्यविधानाद्वाक्यभेदापत्तेः गुणात् कर्मान्तरमेव प्रसिद्धावभृथधर्मकं तुषद्रव्यकञ्च संस्कारार्थत्वेन विधीयते । निष्कासस्यापि च त्यागांशं प्रति गुणत्वाच्च-शब्दोपात्ततुषसमुच्चयोपपत्तिः ।

नचैवं निष्कासस्य संस्कार्यत्वपक्षे(१) 'प्रतिपत्तिरिति चेन्न कर्मसंयोगात्' इति एकादशाधिकरणसूत्रविरोधः, तस्य तुषांशे प्रतिपत्तिनिराकरणार्थत्वेनाप्युपपत्तेः ।

नचैवं तस्य कर्मान्तरस्य प्रतिपत्तित्वे अर्थकर्मभूतप्रसिद्धा-वभृथसादृश्याभावादवभृथशब्दप्रयोगानुपपत्तिः । अग्निहोत्रा-दिवत् संस्कार्यकृतसादृश्याभावेऽपि नामातिदेशविधया साध्यध-र्मसादृश्येन तदुपपत्तेः ।

अस्तु वा तत्रस्थभाष्यानुसारान्निष्कासांशेऽप्यर्थकर्मत्वम् । तथापि प्राप्तकर्मानुवादेन द्रव्यद्वयविधाने वाक्यभेदापत्तेर्गुणादेव भेदो, न तु प्रकरणान्तरात् इत्यवधेयम् ।

(२)केचित्तु उपादेयैकगुणाभाव एवासन्निधिसहितः प्रकर-णान्तरम्, अनुपादेयगुणवदुपादेयानेकत्वस्यापि वाक्यभेदापत्त्या धात्वर्थनिष्ठविधेयतापादकत्वात् । अतश्च तुषनिष्कासरूपानेकगु-णविधाने वाक्यभेदापत्तेर्यागभावनान्तरस्यैव विधेयत्वावगमात् प्रकरणान्तरादेव भेदसिद्धिः । न चैवं वाक्यभेदापादकगुणानेक-त्वस्य गुणविधया भेदकत्वानुपपत्तिः, सर्वस्यैव गुणनामधेयादेस्स-न्निधावेव तत्वेन भेदकत्वाङ्गीकारात् । असन्निधौ तु प्रकरणा-

---

१ जै. सू. ११-२-६५.

२ पक्षोऽयं मीमांसाबालप्रकाशे सम्यगुपपादितः श्रीशङ्करभट्टै स्तत एवावगन्तव्यः, तस्यैव च खण्डनमत्र क्रियत इति वेदितव्यम् ॥

न्तरविधया। अत एव "विश्वजिता यजेते"त्यत्र न संज्ञाया भेदकत्वम्, अपि तूपादेयैकगुणाभावतया प्रकरणान्तरस्यैवेत्याहुः।

तन्न; उपादेयतामतन्त्रीकृत्य स्वमात्रवृत्तिविधेयतापनयेन धात्वर्थवृत्तिविधेयतासम्पादनव्यापारकत्वेन स्वापादितोपादेयतासामानाधिकरण्येन विधेयतासम्पादनाख्यप्रकरणान्तरव्यापारकत्वाभावात्तदन्तर्भावानुपपत्तेः। तथा हि—

सन्निधावसान्निधौ वा गुणानेकत्वं नोपादेयतानेकत्वाद्भेदकम्, सत्यप्युपादेयानेकत्वे "यदग्नये च प्रजापतये चे"त्यादौ अग्नेः प्राप्तत्वेन वाक्यभेदाप्रसक्तेः अभेदकत्वात्। अपि तु विधेयानेकत्वात्। अतश्च तत्रोपादेयतामतन्त्रीकृत्य सन्निध्यसान्निधिसाधारण्येन स्वमात्रवृत्तिविधेयतापनयनपूर्वकधात्वर्थवृत्तिविधेयतापादनं व्यापारः, प्रकरणान्तरस्थले तु न प्राप्तवृत्तिविधेयतापनीयते। प्राप्तकर्मानुवादेनापि मासविधानसम्भवात्, अपितूपादेयता। अतश्च स्ववृत्त्युपादेयतापनयनद्वारा पारिशेष्याद्धात्वर्थवृत्त्युपादेयतामापाद्य तत्सामानाधिकरण्येन विधेयताबोधनमेव प्रमाणान्तरासङ्कीर्णव्यापारः प्रकरणान्तरस्य। अतश्च प्रकरणान्तरव्यापाराभावादुपादेयगुणानेकत्वस्य सन्निधाविवासान्निधावपि गुणविधयैव भेदकत्वम्।

अत एव नामधेयस्यापि सन्निधाविवासन्निधावपि उपादेयतामतन्त्रीकृत्य स्वशक्यतावच्छेदकत्वाक्षेपकत्वेनैव भेदकत्वात् प्रकरणान्तरव्यापारकत्वाभावेन नामधेयत्वेनैव भेदकत्वम्। अतः पूर्वोक्तप्रकारेणैव तुषनिष्कासादौ भेदसिद्धिः। तात्सिद्धं उपादेयगुणाभावविशिष्टानुपस्थितेः प्रकरणान्तराख्याया मासाग्निहोत्रं कर्मान्तरमिति।

"मासं दर्शपूर्णमासाभ्या"मित्यादिवाक्येष्वप्येवम्। तत्र त्वयं

विशेषः(१)-साप्तमिकन्यायेन दर्शपदस्य पूर्णमासपदस्य च प्राकृतयागत्रिकद्रव्यदेवताद्यतिदेशकत्वात्तेषां च एकपदोपादानेन समुच्चयावगतेरुत्पत्तिवाक्यगतसमुच्चितद्रव्यदेवतानुरोधेन संख्यावत् कर्मभेदावसायात् प्रकृतिवद्यागषट्कमेव विधेयमिति ।

नचैवमग्निहोत्रेऽपि प्राकृतसायंप्रातःकालादीनां समुच्चयेनातिदेशादुत्पत्तिवाक्यगतत्वेन भेदकत्वापत्तिः । सायंप्रातःकालादिवत् "विराट्सम्पन्नमग्निहोत्रं भवती"त्यादि वाक्यविहिताया आवृत्तेरपि अतिदेशात्तदादायैव कालादिसमुच्चयोपपत्तेः । प्रकृते तु तदभावात् कर्मभेद इति वैषम्यम् ।

न चैवं सौर्येऽपि प्राकृताग्नेयद्वयधर्माणामेकेन प्रकृतिवच्छब्देनातिदेशात् समुच्चयावगतेरुत्पत्तिवाक्यगतत्वेन भेदकत्वापत्तिः । तत्राकाङ्क्षावशेन कल्प्यस्य प्रकृतिवच्छब्दस्यैकप्रकृतिधर्मैरेव निराकाङ्क्षत्वोपपत्तेः अन्यतराग्नेयवादित्येव कल्पनात् । प्रकृते तु तेन शब्देन लक्षणया धर्मप्राप्तौ समुच्चयस्यावगकत्वात् युक्ता भेदकतेति वैषम्यम् ।

यत्तु कैश्चित् 'मासं दर्शपूर्णमासाभ्या'मित्यनेन द्विवचनेन कर्मद्वयेऽवगते पश्चात्समुच्चितद्रव्यदेवतानुरोधेनैकजात्यवच्छिन्नस्यावान्तरभेद इत्युक्तम्, तत् द्विवचनस्य प्रातिपदिकाभिहितप्रकृतियागगतधर्मसमुदायगतत्वेनानुवादात् "समिधो यजती"तिवद्भेदकत्वानुपपत्तेरुपेक्षितम् ।

नन्वेवमैन्द्राग्नद्रव्यदेवत्यस्यापि दर्शपदेनातिदेशात्सप्तकर्मापत्तिः । न च(२) सोमप्राक्कालरूपैन्द्राग्नधर्माभावादनतिदेशः ।

१ सप्तमाध्यायचतुर्थपादीयप्रथमाधिकरणन्यायेनेत्यर्थः ।

२ 'नासोमयाजी सन्नयेत्' इति असोमयाजिनस्सान्नाय्यनिषेधेन असन्नयत एवैन्द्राग्नविधानेन सोमप्राक्कालिकत्वमैन्द्राग्नधर्म इति भावः ।

तस्यौपदेशिकेन(१) सत्रवृत्तिसोमोत्तरकालत्वेन बाधेऽपि चातुर्मास्यादिवृत्स्यैन्द्राग्नविकृतिष्विव धर्मान्तरातिदेशोपपत्तेः। अत एव प्रकृतिवद्भावबाधापत्तेः नैन्द्राग्नधर्मातिदेश इति केषाश्चिदुक्तमपास्तम्। विकृत्यन्तरेष्वपि तदापत्तेरिति चेत्—

याज्ञिकाचारमूलभूतश्रुत्या ऐन्द्राग्नधर्मपर्युदासोपपत्तेः। सर्वथा प्रकरणान्तरन्यायेन कर्मान्तरमित्येतावत् स्थितम्।

एवं यत्र देशाख्योऽनुपादेयो गुणो निमित्ताख्यो वा तत्रापि कर्मान्तरत्वम्, यथा "सरस्वत्या दक्षिणेन तीरेणाग्नेयोऽष्टाकपाल" इति। न चात्रोपादेयगुणाभावविशिष्टानुपस्थितिसत्त्वेऽपि 'सर्वेभ्यो ज्योतिष्टोमः' इति वद्यज्यसमानाधिकरणाग्नेयपदस्यैव पूर्वकर्मोपस्थापकत्वोपपत्तेर्भेदानुपपत्तिरिति वाच्यम्। आग्नेयपदस्य नामधेयत्वाभावेन यजिपदेन पूर्वविहिताविहितकर्मसाधारण्येनाग्निदेवत्यद्रव्यमात्रवचनस्य विशिष्य पूर्वकर्मोपस्थापकत्वाभावात्।

निमित्तस्य तु 'सत्रायागूर्य विश्वजिता यजेत' इति। आगूरणं सङ्कल्पः, सत्रमकुर्वतः तद्विश्वजितो निमित्तमिति वक्ष्यते। अतश्च 'विश्वजिता यजेत' इति विहिताद्यागात् कर्मान्तरमिदम्।

नचानेन विनियुक्तस्य प्रयुक्तस्य वा 'विश्वजिता यजेत' त्ययमुत्पत्तिविधिरेव किं न स्यादिति वाच्यम्। विनियोगप्रयोगविषयतासामानाधिकरण्येनावगतस्योत्पत्तिपरत्वस्य सान्निधिं विना बाधे प्रमाणाभावात्। तस्मात् सिद्धं कर्मान्तरत्वम्।

प्रयोजनं सूत्रं च स्पष्टम्॥

इत्येकादशं प्रकरणान्तराधिकरणम्।

---

१ 'आहिताग्नय इष्टप्रथमयज्ञा गृहपतिसप्तदशास्सत्रमासीरन्' इति वाक्येन प्रथमयज्ञपदवाच्याग्निष्टामसंस्थाकज्योतिष्टोमोत्तरमेव सत्रविधानात् सोमोत्तरकालत्वं सत्रस्येत्याशयः।

अथ द्वादशं फलसंस्कार्याधिकरणम् (१२) ॥

सू—फलञ्चाकर्मसन्निधौ ॥२—३—२५.॥(सि)

एवं फलं चकारात्संस्कार्यं चानुपादेयत्वाद्भेदकम् । यथा- अनारभ्य श्रुते(१) "रुक्काम आग्नेयमष्टाकपालं निर्वपेदि"त्यादौ यज्यश्रवणेऽपि देशवाक्यवदेव कर्मान्तरत्वोपपत्तिः। संस्कार्यस्य तु अश्वमेधे(२) "त्रैधातवीया दीक्षणीया भवती"ति । अत्र हि त्रैधा- तवीयादीक्षणीययोः भेदात् सामानाधिकरण्यानुपपत्तेः जघन्य- दीक्षणीयापदं स्वशक्यकार्यं यजमानसंस्कारं लक्षयति । अतश्च दीक्षणीयापदेन लक्षणया संस्काराश्रयतया यजमानस्य संस्का- र्यस्योपास्थितत्वात् अनुपादेयसहकृतानुपस्थितेः प्रसिद्धत्रैधातवी- यापेक्षया कर्मान्तरमेवेदम् ।

वस्तुतस्तु यज्यसमानाधिकरणस्य त्रैधातवीयापदस्य पूर्वक- र्मोपस्थापकत्वोपपत्तेः नेदं कर्मान्तरम् ।

यत्तु भवदेवेन त्रैधातव्यापदस्य पूर्वकर्मोपस्थापकत्वे कार्या- न्तरसम्बन्धे च गौरवापत्तेः कर्मान्तरविधिरेवायं इत्युक्तम् । तत् "सर्वेभ्यो दर्शपूर्णमासा" वित्यादावपि तदापत्तेः पूर्वकर्मोप- स्थापकत्वे च व्यापारान्तरानपेक्षणात् प्रत्युत कर्मान्तरविधान एव गौरवापत्तेरुपेक्षितम् । वार्तिके तदुदाहरणन्तु धात्वर्थाभेदेऽ- पि भावनाभेद इति प्रौढिपक्षाभिप्रायेण ।

---

१. रुक्कामः तेजस्कामः ।

२. आप. श्रौ. २०–८–४. आग्नावैष्णवहविष्का काचिदिष्टिः त्रैधातवीयेष्टिः । त्रैधातवीयापदनिर्वचनं तु तैत्तिरीयसंहितायां द्वि तीयकाण्डे चतुर्थप्रपाठके द्वादशानुवाके द्रष्टव्यम् ।

संस्कार्योदाहरणन्तु 'औदुम्बरीं प्रोक्षती' त्यादि व्रीहि-प्रोक्षणाद्यपेक्षया प्रोक्षणान्तरविधायकमिति द्रष्टव्यम् ।

नन्वेवमपि पूर्वसूत्रेणैव सर्वानुपादेयसङ्ग्रहोपपत्तेस्सूत्रान्तर-प्रणयनवैयर्थ्यम् । न हि फलसंस्कार्ययोरनुपादेयत्वं दुर्ज्ञेयम् । येन तदुपपादनार्थमेतदारम्भो युज्येत । वाजपेयाधिकरणे प-श्वानामप्यनुपादेयत्वस्य स्थापितत्वादिति चेत्—

न ; फलसंस्कार्ययोः प्रकरणान्तरविधया भेदकत्वानुपपत्ति-शङ्कानिराकरणार्थत्वात् । एतयोर्हि अङ्गित्वादिनियोगाविधि-विषयत्वापरपर्यायाङ्गत्वमात्रस्य धात्वर्थङ्गाचितया आक्षेपात्तत्सामा-नाधिकारण्येनोत्पत्तिविषयत्वापरपर्यायाविधेयत्वाक्षेपकत्वेऽपि उ-पादेयत्वानाक्षेपकत्वान्न प्रकरणान्तरविधया भेदकत्वम् । का-लदेशनिमित्तानां त्वनुष्ठापकत्वेन प्रयोगविशेषणत्वाद्धात्वर्थे अनु-ष्ठाप्यत्वापरपर्यायोपादेयताक्षेपकत्वाद्युक्तं तद्विधया भेदकत्व-मितीमामाशङ्कां निराकर्तुमिदं सूत्रम् । सत्यप्यङ्गित्वे अनुष्ठा-पकत्वस्यापि कामनाविषयत्वेन सत्त्वादुपादेयत्वाक्षेपकत्वोपपत्ते-रकर्मसन्निधौ युक्तं तद्विधया भेदकत्वमिति ।

अत्र केचित्—कृतिविषत्वमेवोपादेयत्वमङ्गीकृत्य कर्तृविशेष-णानामेकत्वब्राह्मणत्वादीनामपि अनुपादेयत्वमिच्छन्ति । अत एव 'आनुपादेयमेकत्वं यजमानस्य कालवत्' इति कण्डिका सङ्ग-च्छते इत्याहुः । तन्न, कृतिर्हि यथैव विषयनिरूप्या तथा आ-श्रयनिरूप्यापि । अतश्चोपादेयत्वमपि कृतिविषयत्वाश्रयत्वान्य-तरत्वमेव । अत एवाप्रवृत्तप्रवर्तनारूयविधिव्यापारगम्यत्वमु-पादेयस्येत्युक्तम् । अत एव चाख्यातोपात्तः कर्ता उपादेय इत्य-पि कण्डिकान्तरं सङ्गच्छते । अन्यथा कृतिविषयत्वाभावेन तस्य तदनुपपत्तेः ।

न च कर्तुराश्रयत्वेऽपि तद्विशेषणानामेकत्वादीनां तदभावात् कथमुपादेयतोपपत्तिः। क्रियाया अविषयत्वे ऽपि तद्विशेषणानां द्रव्यादीनां विषयत्वेनोपादेयत्ववदेकत्वस्यापि तदुपपत्तेः । अत एवास्माभिः कृतिसमवायाघटितसम्बन्धेनेत्येव विशेषितमनुपादेत्वलक्षणे । एकत्वादेरनुपादेयत्वोक्तिस्तु यथाशक्त्युपबन्धप्रयोजकीभूतकृतिविषयत्वरूपोपादेयत्वनिषेधपरा। तस्मात् पञ्चैवानुपादेयानीति तान्येव भेदप्रयोजकानि ।

प्रयोजनं—पूर्वपक्षे प्रकृतित्वात् प्रतिपदि करणम् । सिद्धान्ते पर्वणीति ।

सूत्रं स्पष्टम् ॥

इति द्वादशं फलसंस्कार्याधिकरणम् ।

अथ त्रयोदशं प्रकरणान्तरप्रत्युदाहरणाधिकरणम् ॥(१३)

सू—सन्निधौ त्वविभागात् फलार्थेन पुनः श्रुतिः ॥ २–३–२६. ॥ (सि)

(विषयः)

पञ्चस्वपि अनुपादेयेषु सन्निधौ प्रत्युदाहरणार्थमिदं सूत्रम् । यथा 'सायं जुहोती' त्यादि अग्निहोत्रं प्रकृत्य, 'समे दर्शपूर्णमासाभ्यां यजेत' 'यावज्जीवं दर्शपूर्णमासाभ्यां यजेत' "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति दर्शपूर्णमासौ प-

कृत्य, "स्विष्टकृतं यजती" ति प्रकृत्य च 'शेषात् स्विष्टकृतं यजती'ति श्रुतानि पञ्चानामप्युदाहरणानि ।

(संशयः)

तत्रापि किमुपादेयगुणाभावमात्रेण भेदः ? उत नेति विचार्यते ।

(पूर्वपक्षः)

तत्र यद्यप्युपादेयत्वस्य कृतिविषयत्वाश्रयत्वान्यतरत्वरूपस्य विधेयत्वस्य चाप्राप्तप्रापणरूपस्य भेदो वाजपेयाधिकरण एव निरूपितः तथापि तयोरुत्सर्गसिद्धस्य सामानाधिकरण्यस्य त्यागे प्रमाणाभावात् सन्निधावपि उपादेयगुणान्तराभावेन उपादेयत्वे धात्वर्थवृत्तितयाऽऽक्षिप्ते उत्पत्तिविधिविषयत्वाख्यं विधेयत्वमपि सामानाधिकरण्यसिद्ध्यर्थमाक्षेप्तव्यम् । न ह्यत्र वैयधिकरण्येनापि तदाक्षेप्तुं शक्यम् । कालाद्युत्पत्तेर्लोकसिद्धत्वेनाविधेयत्वात् । निमित्तफलसंस्कार्याणामनङ्गत्वेन विनियोगविधिविषयत्वादिरूपस्यापि विधेयत्वस्यायोगाच्च । अतः कर्मैव विधेयमिति विहितविधानायोगाद्भिद्यत इति प्राप्ते—

(सिद्धान्तः)

अभिधीयते—पूर्वकर्मोपस्थापकाधिकाराख्यस्य सन्निधेर्बाधायोगान्नात्र कर्मभेदः । न च विधिश्रुतिप्रमितसामानाधिकरण्यानुरोधेनाभ्यास इव सन्निधेर्बाधो युक्त इति वाच्यम् । विधेरेव "दध्ना जुहोती" तिवद्विशिष्टोत्पत्तिविधिगौरवपरिहारार्थं सन्निध्युपजीवकत्वेनोत्पत्तिपरत्वानङ्गीकारात्सामानाधिकरण्यासिद्धेः । 'मासमग्निहोत्रं जुहोति' इत्यत्र तु सन्निध्यभावात्सामानाधिकरण्यबाधो जुहोतेश्च कथञ्चित् "यदाहवनीये जुहोती"तिपूर्वकर्मोपस्था-

पकत्वकल्पनेति दोषद्वयापेक्षया विशिष्टविध्यङ्गीकार एव युक्त इति वैषम्यम्।

अत एव कालदेशवाक्ययोः न कालादिविधिपरत्वम्। अपि तु कर्मांशे प्रयोगविधिः, कालांशे विनियोगविधिः, संभवति हि कालदेशयोः वाजपेयाधिकरणोक्तरीत्या कृतिव्याप्यत्वरूपप्रयोगविषयत्वासंभवेऽपि यागोद्देशप्रवृत्तपुरुषकृतौ अधिकरणतासम्बन्धेन कारकत्वाद्यागाङ्गत्वेन विनियोगः। यत्र तु 'य इष्ट्या' इत्यादौ प्रयोगोऽपि प्राप्तस्तत्र कर्मानुवादेन कालाद्यंशे विनियोगविधिरेवेत्युक्तं पौर्णमास्यधिकरणे। निमित्तफलसंस्कार्याणां त्वनङ्गत्वेन विनियोगानर्हत्वात्तदनुवादेन स्वरूपेण प्राप्तस्यापि कर्मणो विनियोगविशिष्टप्रयोगविधानं विनियोगमात्रविधानं वा। तत्र निमित्तस्य कृतिकारकत्वाभावेनानङ्गत्ववत् पुरुषार्थत्वाभावेनानाङ्गित्वस्यापि सत्वादनुष्ठापकत्वेन च प्रयोगाक्षेपकत्वात् तस्य च फलापेक्षायां यावज्जीवाधिकरणवक्ष्यमाणरीत्या पापक्षयाद्यर्थं विनियोगः कल्प्यते।

फलसंस्कार्ययोस्तु पुरुषार्थत्वात् स्वार्थमेव विनियोगः। कामनाया अनुष्ठापकत्वात्तत्र प्रयोगोऽपि। संस्कार्ये तु प्रधानस्यैवानुष्ठापकत्वात् प्रयोगस्यान्यतो लाभेन शेषाख्यसंस्कार्योद्देशेन विनियोगमात्रमिति विवेकः।

तदेवमुत्पत्तिप्रत्यभिज्ञाने विधिफलस्य विनियोगादिविषयत्वेनोपपत्तेरुत्पत्तिविषयत्वाभावान्न कर्मभेदः। एवमधिकाराख्यसन्निध्यभावेऽपि यत्र यच्छब्दयोगो यथा 'य इष्ट्या' इत्यादौ तत्रापि पूर्वविहितकर्मोत्पत्त्याद्यनुवादप्रतीतेः कालविनियोगविधिमात्रकरणेन कर्मभेदः। यजेत इति प्रत्ययेन च सकलभावनानुवादान्न तदनेकत्वकृतो वाक्यभेदः।

पदद्वयेन च पर्वलक्षणात् चशब्दस्य च निपातत्वेन भावनान्वयं विनापि कालान्वयोपपत्तेर्विकल्पविशिष्टकालविधानान्न तदनेकत्वकृतोऽपि वाक्यभेदः ।

तथा यच्छब्दयोगस्याप्यभावेऽपि "एतया पुनराधेयसम्मितयेष्ट्वाऽग्निहोत्रं जुहोती"ति विधौ नाग्निहोत्रभेदः । "दीक्षितो न जुहोती"तिनिषेधापेक्षितोदवसानीयरूपावधिमात्रविधौ तात्पर्यग्राहकतयाऽनुवादात् । अतस्सिद्धं पूर्वकर्मोपस्थापकप्रमाणं कर्मान्तरत्वप्रमाप्रतिबन्धकमिति ।

ननु–स्वरूपसत्पूर्वकर्मोपस्थापकं प्रमाणं कर्मान्तरत्वप्रमाप्रतिबन्धकम्, तदभावश्च तां प्रति कारणम् । 'मासमग्निहोत्रं जुहोति'इत्यत्र पूर्वकर्मोपस्थापकभ्रमदशायां वस्तुतस्तदभावसत्वेन भेदप्रमोत्पत्तिप्रसङ्गात् । नापि भ्रमप्रमासाधारणं तदभावज्ञानं कारणम् । तथात्वे 'सायं जुहोती'त्यादावभावभ्रमदशायां भेदप्रमापत्तेः । नापि तदभावप्रमा । गृहमेधीये 'आज्यभागौ यजति'इत्यत्र पूर्वकर्मोपस्थापकस्यातिदेशस्याभावभ्रमदशायां भेदप्रमापत्तेः ।

अत एव पूर्वकर्मोपस्थापकप्रमाणज्ञानत्वेन भ्रमप्रमासाधारण्येन प्रतिबन्धकता, भेदज्ञानत्वेन प्रतिबध्यता, अतश्च प्रतिबन्धकाभावसत्वे भेदज्ञानोत्पत्तेर्विषयाबाधेन प्रमात्वसिद्धिरित्यपास्तम् । उक्तप्रमाणज्ञानेऽप्रामाण्यज्ञानदशायां उत्तेजकसत्वेन भेदप्रमापत्तेः ।

नचात एव कैश्चिन्नोपादेयगुणाभावो भेदप्रयोजकः, अपि तु अनुपादेयगुणसत्वैवेत्युक्तम् । अतश्चोक्तोदाहरणे तदभावेनैव भेदाप्रसक्तेर्युक्तमेव नाम्नस्सान्निध्यभावेऽपि पूर्वकर्मोपस्थापकत्वमिति वाच्यम् । अनुपादेयगुणस्य पारिशेष्येण धात्वर्थवृत्त्युपादेयतापादनस्य तदभावेऽपि गुणसामान्याभावमात्रेण सिद्धेरुपादेयगुणाभावस्यैव भेदप्रयोजकत्वात् । अतः कथं सन्निधेस्तत्प्र-

तिबन्धकत्वमिति चेत्—

न ; भेदाननुगुणस्वेतराबाध्यपूर्वकर्मोपस्थापकप्रमाणज्ञानमात्रस्य भेदप्रमाप्रतिबन्धकतांगीकारात् । अस्ति च 'सायं जुहोती'त्यादौ तत्, पूर्वकर्मोपस्थापकस्य सन्निधेः केनापि प्रमाणेनाबाधात् नाम्नः पूर्वकर्मोपस्थापकस्यापि नामातिदेशविधया भेदानुगुणत्वान्न भेदप्रमाप्रतिबन्धकत्वम्। अस्ति च "आज्यभागौ यजती"त्यत्रापि पूर्वकर्मोपस्थापकप्रमाणस्यातिदेशभेदस्य स्वपदोपात्तभेदबाध्यत्वेऽपि तदितरेणाबाध्यत्वम् । न हि तत्रातिदेशः प्रकारान्तरेण बाध्यते अपि तु क्लृप्तोपकारपूर्वाज्यभागाभेदादेव । अतश्च तत्रासत्यपि प्रमाणे स्वेतराबाध्यपूर्वकर्मोपस्थापकप्रमाणज्ञानस्य संभावनात्मकस्य सत्वाद्भेदप्रमाप्रतिबन्धकत्वोपपत्तिः । 'मासमग्निहोत्रं जुहोती'त्यत्रापि उक्तविधज्ञाने प्रमात्मके सति भेदप्रमाप्रतिबन्धसत्वान्न व्याहतिः ।

भेदप्रमाजनकं च भेदाननुगुणपूर्वकर्मोपस्थापकप्रमाणप्रतियोगिकस्य स्वेतरप्रयुक्तस्याभावस्य प्रमा । अस्ति चेदं मासाग्निहोत्रे सन्निध्यभावस्याभेदातिरिक्तासंबन्धिपदव्यवधानप्रयुक्तत्वात् । आज्यभागयोश्चातिदेशाभावस्याभेदप्रयुक्तत्वेऽपि तदितरप्रयुक्तत्वाभावेन कर्मान्तरत्वानापत्तिः । नह्यभेदोपजीव्यातिदेशाभावस्योपजीव्यविरुद्धभेदप्रयोजकत्वं सम्भवतीति युक्तं अकर्मान्तरत्वम् । अतस्सिद्धं प्रत्यभिज्ञाने सर्वत्राकर्मान्तरत्वम् । प्रयोजनं स्पष्टम् ।

सूत्रं फलशब्दस्यानुपादेयमात्रोपलक्षणत्वं 'आज्यभागौ यजती'त्यत्र च गृहमेधीयसंबन्धोपलक्षणत्वमङ्गीकृत्य व्याख्येयम् ।

इति त्रयोदशं प्रकरणान्तरप्रत्युदाहरणाधिकरणम् ॥

———:o:———

अथ चतुर्दशमाग्नेयस्तुत्यर्थताधिकरणम् ॥ (१४)

सू-आग्नेस्तूक्तहेतुत्वादभ्यासेन प्रतीयेत ॥ २-३-२७. ॥ (पू)

(विषयसंशयौ)

कालद्वये आग्नेयद्वयं विधाय तत्रैव प्रदेशान्तरे(१)'आग्नेयोऽष्टाकपालोऽमावास्यायां भवति' इति पुनराम्नातम्। तत्र किं अच्युतवाक्यबोध्यदर्शस्थाग्नेयापेक्षया कर्मान्तरविधानं ? उत नेति संशयः॥

(सङ्गतिः)

पादाध्यायसङ्गती पूर्ववत्। आतिदेशिकी त्वनन्तरा। अधिकाशङ्कार्थश्चेदं सूत्रम्। तथा हि--

(पूर्वपक्षः)

पूर्वत्र हि सत्यप्यप्राप्तोपादेयगुणाभावे सन्निधिसत्वान्न भेदकता। प्रकृते तु सत्यापि सन्निधाने न तस्य भेदप्रतिबन्धकत्वम्। स हि कर्मोत्पत्तिं प्रत्यभिज्ञापयन् विधिफलस्य च फलादिसंबन्धिविषयत्वञ्चोपनयन् उत्पत्तिनिबन्धनभेदं प्रतिबध्नाति। प्रकृते तु विधिफलस्यान्यविषयत्वानुपपत्तेः उत्पत्तिविषयत्वावसायान्न विधिविरोधिनस्सन्निधेर्भेदप्रतिबन्धकत्वोपपत्तिः। न चैतस्य स्तावकत्वाङ्गीकारेण भेदकत्वस्यैव सिद्धिः। आग्नेयस्य तावत् प्रदेशान्तरस्थत्वेनैव स्तुत्यनुपपत्तेः। ऐन्द्राग्नस्य तु आग्नेयगतप्रशस्तत्वकीर्तनात् स्तुतिरनाशङ्क्यै-

---

१ तै. सं. २-५-३.

व । अतो वैयर्थ्यपरिहारार्थमेव विधित्वावसायात् अप्राप्तोपादेयगुणाभावसत्वेन च प्रकरणान्तरस्याविकलत्वाद्भेदासिद्धिः ।

अथ वा अस्त्वभ्यासाद्भेदः । अतश्चामावास्यायां आग्नेयद्वयं कार्यमिति पूर्वपक्षे प्रयोजनं सिध्यति । न च सम्प्रतिपन्नदेवताकत्वात् सहानुष्ठानशङ्का, पुनर्विधिवैयर्थ्यस्यैव तद्बाधकत्वात् । अतस्सूत्रं आग्नेयः उक्तप्रमाणवशात् भिन्नः प्रतीयेत । ततश्चानुष्ठानकालेऽपि द्विरभ्यस्येतेति व्याख्येयम् ॥

सू-अविभागात्तु कर्मणो द्विरुक्तेन विधीयेत ॥ २-३-२८. ॥

सिद्धान्तैकदेशी समाधत्ते—सत्यप्यप्राप्तोपादेयगुणाभावे सन्निधिना तदीयद्रव्यदेवताकस्य तदनुमितयागस्य प्रत्यभिज्ञानान्नात्र कर्मान्तरम् । न च विधिफलाभावः, द्विराम्नानबलात् वाक्यद्वयविहितस्यैवाभ्युदयकारित्वकल्पनया पूर्वकर्मण एव विधिफलविषयत्वोपपत्तेः । न चैकेन विहिते इतरस्य विधायकतानुपपत्तिः । पिङ्गाक्ष्यैकहायनीशब्दाभ्यां द्रव्यविशेषस्येव वाक्यद्वयेनाप्येकस्य कर्मणो युगपद्विधानोपपत्तेः । सूत्रं स्पष्टम् ॥

(सिद्धान्तः)

सू—अन्यार्था वा पुनः श्रुतिः ॥ २-३-२९. ॥ (सि)

सिद्धान्तस्तु—सत्यं न कर्मभेदः । तथापि नापि विधित्वम्, एकेन विहिते अपरेण तदयोगात् । एकहायन्यादौ गुणान्तरविधानादर्थवत्ता । नचाभ्युदयाशिरस्कत्वे सा, यत्र ह्यस्ति विषयभेदः विषययोश्चैकेनैव संभवल्लाभत्वं तत्राग(?)त्याभ्युदयाशिरस्कत्वकल्पनं, यथा—अनारभ्याधीतमित्रविन्दादिप्रकरणस्थसाप्तदश्य-

विध्योः । तत्र हि एकस्य वाक्यस्य सामिधेनीसंबन्धो विषयः अपरस्य च क्रतुसबन्धः इति विषयद्वयस्यैकेनापि सम्भवल्लाभम् । तत्रैकेनैकस्यैवावगमे अभ्युदयशिरस्कत्वकल्पनं युक्तम् । न च विनिगमनाविरहः । झटित्युपस्थापकत्वस्यैव तत्वात् । प्रकृते तु विषयभेदाभावान्नाभ्युदयशिरस्कत्वकल्पनावसरः । अत एव समिच्चनूनपाद्वाक्ययोस्तन्नाङ्गीकृतम् ।

किंचेदं सति विधित्वे युज्यते । तत्तु ऐन्द्राग्नविध्येकवाक्यतया तत्प्रशंसार्थत्वेनोपपत्तेरसिद्धम् । संभवति चातिप्रशस्ताग्नेयसाहित्यैन्द्राग्नस्यातिप्रशस्ततरत्वमिति स्तुतिः । (१)तस्मान्नेदं कर्मान्तरम् ।

मीमांसाम्बुनिधिं प्रमथ्य सुदृढैर्न्यायोच्चयैर्निर्जरैः
कृत्वा जैमिनिसूत्रमन्दरममुं वेदं तथा वासुकिम् ।
यद्धालाहलसंज्ञमत्र कलितं ग्रन्थान्तरं सज्जनैः
श्रीकृष्णस्य तु भूषणाय स परं यः कौस्तुभाख्यो मणिः ॥

श्रीरुद्रदेवसूनोः कृतिरेषा खण्डदेवस्य ।
मीमांसाकौस्तुभाख्या भेदाध्याये तृतीयाङ्घ्रेः ।

इति पूर्वोत्तरमीमांसापारावारपारीणश्रीरुद्रदेवसूनोः
खण्डदेवस्य कृतौ मीमांसाकौस्तुभे
द्वितीयस्याध्यायस्य
तृतीयः पादः ॥

॥ शुभमस्तु ॥

(१) तस्मादकर्मान्तरम् ।

॥ श्रीः ॥

मीमांसाकौस्तुभः ।

द्वितीयाध्यायस्य चतुर्थः पादः (यावज्जीवपादः)

यावज्जीवाधिकरणम् ॥ १ ॥

सू—यावज्जीविकोऽभ्यासः कर्मधर्मः प्रकरणात् (२—४—१.)

(विषयसंशयौ)

"यावज्जीवं दर्शपूर्णमासाभ्यां यजेत," "यावज्जीवमग्निहोत्रं जुहोती"ति श्रुतम् । तत्र किं काम्य एव स्वर्गाद्यर्थे दर्शपूर्णमासादिप्रयोगे जीवनपर्याप्तकालविधिरयम् ? किं वा क्लृप्तफलात् फलान्तरार्थं जीवनाख्यनिमित्तरूपगुणवशेन दर्शादेर्विनियोगान्तरविधिरिति विचारः ।

(सङ्गतिः)

विनियोगभेदनिरूपणस्य च पादार्थत्वात् पादाध्यायसङ्गतिः । पूर्वत्र कर्मस्वरूपभेदः क्वचिच्च(१.)अवेष्ट्यधिकरणादौ प्रयोगभेद एव निरूपितः, न क्वचिदपि विशिष्य विनियोगभेद इति इह निरूप्यमाणत्वात् पादार्थः । अनन्तरा तु निमित्तस्य इह गुणविधया भेदकत्वेऽपि अनुपादेयत्वमात्रेण प्रकरणान्तरतुल्यत्वात् प्रसङ्गरूपा ।

---

१. पू. मी. २-३-२.

(पूर्वपक्षः)

तत्र यावज्जीवशब्दस्य "यावद्दोहं तिष्ठती" त्यादौ काले5पि निरूढलक्षणया प्रयोगदर्शनेन कालपरत्वोपपत्तेः, णमुलन्तस्यापि च (१)"अग्निकामं जुहोती" त्यादौ निमित्तपरत्वादर्शनात्, अनुशासनाभावाच्च तत्परत्वानुपपत्तेः, स्वर्गाद्यर्थेषु दर्शादिषु जीवनपर्याप्तकालविधिरेवायम् । एवञ्च कालस्य वाक्येनैवाङ्गताबोधने5पि इतिकर्तव्यताकाङ्क्षालक्षणप्रकरणापेक्षितार्थसमर्पणात् प्रकरणानुग्रहो5पि । इतरथा हि प्रकृतयोर्दर्शपूर्णमासयोरेव निमित्तसम्बन्धात् अधिकारात्मकप्रकरणा5नुग्रहे5पि निमित्तस्या5नङ्गतया कथम्भावात्मकप्रकरणापेक्षितार्थसमर्पणा5भावान्न तदनुग्रहः । अत एव कालरूपानुपादेयगुणसत्त्वे5पि अनुपस्थित्यभावात् न कर्मान्तरविधिः ।

न च उत्पत्तिशिष्टपौर्णमास्यादिकालावरोधात् न जीवनपर्याप्तकालविधिसम्भवः । "अमावास्यायामपराह्ण" इत्यादिवद्व्याप्यव्यापकभावेना5विरोधात् ।

अत्र च यथैव "सायं जुहोति" "पौर्णमास्यां पौर्णमास्या यजेते" त्यादौ कालविशिष्टप्रयोगविधिः एकादशे वक्ष्यते तथैवेहापि जीवनपर्याप्तकालविशिष्टप्रयोगविधिर्विनिगमनाविरहादभ्युपगन्तव्यः । अत एव व्याप्यकालिकप्रयोगविधौ प्रतिप्रयोगपर्याप्तः धर्मः विधेयतावच्छेदकत्वेनाङ्गीकर्तव्यः । व्यापककालिकप्रयोगविधौ तु जीवनपर्याप्तेषु तावत्सु व्याप्यकालिकप्रयोगेषु व्यासक्तः । द्वयोः प्रयोगविध्योः व्याप्यव्यापकभावेना5विरोधात् ।

---

१. तै. सं. २–५–७.

हरिदाससंस्कृतग्रन्थमालासमाख्य-

काशीसंस्कृतसीरीज्-पुस्तकमाला ।

इयं काशी—संस्कृतग्रन्थमाला विभागशः प्रकाशिता भवति । एतस्यां प्राचीनाः नवीनाश्च दुर्लभाः सुलभाश्च अत्युपयुक्ताः संस्कृतग्रन्थाः काशिकराजकीयसंस्कृतपाठशालीयैः पण्डितैरन्यैरपि विद्वद्भिः संशोधिताः क्रमेण संमुद्रिता भवन्ति । अस्यां प्रकाश्यमाणानां ग्रन्थानां मूल्यं सूचीपत्रे प्रकाशितं वर्तते । परंतु एतस्या नियमेनाऽविच्छिन्नतया निश्चितग्राहकमहाशयानां प्रतिमुद्राशतकं पञ्चविंशतिमुद्राः (कमिशन) परावर्तिता भवेयुः मार्गव्ययश्च न पृथक् दातव्यो भवेत् ।

तत्र मुद्रितग्रन्थनामानि ।	मूल्यम् ।
१ नलपाकः नलविरचितः । संपूर्णः (पाकशास्त्रम् १)	रु० १—८
२ संक्षेपशारीरकम् । रामतीर्थस्वामिकृतान्वयार्थबोधिनीटीकासहितम् । (वेदान्तं १)	रु० ८—०
३ वैशेषिकदर्शनम् । पं० श्रीदुण्ढिराजशास्त्रिकृतविवरणोपेताभ्यां प्रशस्तपादभाष्योपस्काराभ्यां समन्वितम् (वैशेषिकं १)	रु० २—८
४ श्रीसूक्तम् । विद्यारण्यपृथ्वीधरश्रीकण्ठाचार्यकृतभाष्यत्रयेण टिप्पण्या च समलङ्कृतम् । (वैदिकं १)	रु० ०—६
५ लघुशब्देन्दुशेखरः (भैरवी) चन्द्रकलाटीकासहितः तत्पुरुषादिसमाप्तिपर्यन्तः । (व्याकरणं १)	रु० ८—०
६ कारिकावली मुक्ता० दिन० राम० शब्दखण्डसहिता तथा "गुणनिरूपणदिनकरीय" महामहोपाध्याय पं० श्रीलक्ष्मणशास्त्रिकृतव्याख्यासहिता । (न्यायं १)	रु० ६—०
७ पञ्चकिरणम् । वार्तिकाभरणालङ्कृतवार्तिकटीकया-तत्त्वचन्द्रिकासमवेतविवरणेन च समन्वितम् । (वेदान्तं २)	रु० ०—८
८ अलङ्कारप्रदीपः । पण्डितवरविश्वेश्वरपाण्डेयनिर्मितः । (काव्यं १)	रु० ०—८
९ अनङ्गरङ्गः महाकविकल्याणमल्लविरचितः । (कामशास्त्रं १)	रु० ०—१२
१० जातकपारिजातः । श्रीवैद्यनाथशर्मणा विरचितः । (ज्यो० १)	रु० २—०
११ पारस्करगृह्यसूत्रम् । कात्यायनसूत्रीयश्राद्ध-शौच-स्नान-भोजन-कल्पसहितम् । (कर्मकाण्डम् १)	रु० ०—८
१२ पुरुषसूक्तम् । सायणभाष्य-महीधरभाष्य-मंगलभाष्य-निम्बार्कमतभाष्यचतुष्टयसहितम् । (वैदिकं २)	रु० १—४
१३ श्रीमत्सनत्सुजातीयम्—श्रीमच्छङ्करभगवत्पादविरचितभाष्येण नीलकण्ठीव्याख्यया च संवलितम् । (वेदान्तं ३)	रु० १—४
१४ कुमारसंभवं महाकाव्यम् । महाकवि-श्रीकालिदासवि० । सञ्जीवनी-शिशुहितैषिणी-टीकाद्वयोपेतम् सम्पूर्णम् । (काव्यं २)	रु० १—८

१५ श्रुतबोधश्छन्दोग्रन्थः । आनन्दवर्द्धिनीतात्पर्यप्रकाशाख्यसंस्कृत-भाषाटीकासहितः । (छंदः १) रु० ०—६

१६ कारिकावली । मुक्तावली-न्यायचन्द्रिकाटीकाद्वयसहिता सटिप्पणा । (न्यायं २) रु० १—०

१७ पारस्करगृह्यसूत्रम् । काण्डद्वये हरिहर-गदाधर० तृतीयकाण्डे हरिहर-जयराम-प्रणीतभाष्येण समलङ्कृतम् । हरिहरभाष्यसहितस्नानत्रिकाण्डिकासूत्र—गदाधरभाष्यसहितश्राद्धनवकण्डिकासूत्रैः यमलजननशान्ति-पृष्ठोदिवि-शौच-भोजन—कामदेवकृतभाष्यसहितोत्सर्गपरिशिष्टसूत्रैः परिष्कृतं-टिप्पण्यादिभिः सहितं च । (कर्मकाण्डं २) रु० ३—०

१८ संक्षेपशारीरकम्-मधूसूदनीटीकासहितम् संपूर्ण (वेदान्तं४) रु० ८—०

१९ लघुजूटिका-अर्थात् अभिनवा परिभाषेन्दुशेखरपरिष्कृतिनिर्मितिः। (व्याकरणं २) रु० ०—८

२० कातीयेष्टिदीपकः । (दर्शपौर्णमासपद्धतिः) महामहोपाध्याय-पं० श्रीनित्यानन्दपन्तपर्वतीयविरचितः । (कर्मकाण्डं) रु० १—०

२१ सप्तपाठि-श्रीशिवमहिम्नस्तोत्रम् श्रीगन्धर्वराज पुष्पदन्ताचार्यविरचितम् । हरिहरपक्षीय-मधुसूदनीटीकया (संस्कृतटीका-संस्कृतपद्यानुवाद-भाषाटीका-भाषापद्यानुवाद-भाषाबिम्ब) पञ्चमुखीनाम्न्या टीकया-शक्तिमहिम्नस्तोत्रेण च समन्वितम् । (स्तोत्रवि० १) रु० १—०

२२ बौद्धाऽऽचार्यश्रीधर्मकीर्तिप्रणीतः सटीकन्यायबिन्दुः—भाषाटीकासहितः (बौद्धन्याय वि० १) रु० १—८

२३ सपरिष्कृत-दर्पणसहितवैयाकरणभूषणसारः (व्याकरणं ३) रु० ४—०

२४ न्यायवार्त्तिकतात्पर्य्यटीका-श्रीवाचस्पतिमिश्रविरचिता । सम्पूर्ण (न्यायविभाग ३) रु० ६—०

२५ मीमांसान्यायप्रकाशः (आपदेवीयः) श्रीचिन्नस्वामिशास्त्रिकृतया सारविवेचिन्या व्याख्यया सहितः (मीमांसा १) रु० २—०

२६ पौरोहित्यकर्मसारः (टिप्पणीसमलंकृतः) प्रथमो भागः श्रीरमाकान्तशर्मणा संगृहीतः। (कर्मकाण्डवि० ३) रु० ०—४

२७ लघुशब्देन्दुशेखरः म० म० श्रीनागेशभट्टविरचितः। अव्ययीभावान्तो भागः, म०म० पण्डित श्रीनित्यानन्दपन्त-पर्वतीयकृतशेखरदीपकाख्येन टिप्पणेन समुज्ज्वलितः। (व्या०४) रु० ३—८

२८ रघुवंशमहाकाव्यम् । महाकविश्रीकालिदासविरचितम् पञ्चसर्गात्मकम् । म० म० श्रीमल्लिनाथसूरिकृतसञ्जीविनीटीकया पं० श्रीकनकलालठक्कुरकृतार्थप्रकाशिकाटीकया च समलङ्कृतम् । (काव्यवि० ३) रु० ०—१२

२९ कामसूत्रम् । श्रीवात्स्यायनमुनिप्रणीतं बहुयत्नरासादितया पूर्णया जयमङ्गलरचितया टीकया समेतम् । बहुखण्डितपाठान् परिपूर्य,सूत्राङ्कांश्च संयोज्य, परिष्कृत्य संशोधितम् । (काम०२) रु० ८—०

३० न्यायकुसुमाञ्जलिः । न्यायाचार्यपदाङ्कितश्रीमदुदयनाचार्यविरचितः । महामहोपाध्यायरुचिदत्तकृतमकरन्दोद्भासितमहामहोपाध्यायवर्द्धमानोपाध्यायप्रणीतप्रकाशसहितः। (न्यायं४) रु० ६—०

३१ परिभाषेन्दुशेखरः । म० म० श्रीनागेशभट्टरचितः । म० म० भैरवमिश्रविरचितया भैरवीत्यपराख्यया परिभाषाविवृत्या–तत्त्वप्रकाशिकया टीकया च सहितः । व्याकरणं ४) रु० ३—०

३२ अर्थसंग्रहः । पूर्वमीमांसासारसंग्रहरूपः । श्रीलौगाक्षिभास्करविरचितः। श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामेश्वरशिवयोगिभिक्षुविरचितमीमांसार्थकौमुद्याख्यव्याख्यासहितः। (मीमां०२) रु०१—०

३३ न्यायवार्त्तिकम् न्यायदर्शनवात्स्यायनभाष्योपबृंहणम् । परमर्षिभारद्वाजोद्द्योतकरविरचितम् । महर्षि–गोतमादिचरितसम्वलितबृहत्भूमिकासहितम् । (न्यायं ५) रु० ६—०

३४ शुक्लयजुर्वेदसंहिता । वाजसनेयिमाध्यन्दिनशाखीया । श्रीमदुव्वटाचार्यविरचितमन्त्रभाष्येण श्रीमन्महीधराचार्यविरचितवेददीपेन च सहिता । (भाग १–२–३–४) (वैदिकं ३) रु० ८—०

३५ शुक्लयजुर्वेदकाण्वसंहिता । श्रीसायणाचार्यविरचितभाष्यसहिता । १ अध्यायादारभ्य २० अध्यायपर्यन्ता । (वैदिकं ४) रु० ६—०

३६ सिद्धान्तलेशसंग्रहः । श्रीमदप्पयदीक्षितविरचितः । श्रीमत्परमहंसपरिव्राजकाचार्यकृष्णानन्दतीर्थविरचितया कृष्णालङ्काराख्यया व्याख्यया समलंकृतः । (वेदान्तं ४) रु० ६—०

३७ काशिका । श्रीपाणिनिमुनिविरचितव्याकरणसूत्राणां वृत्तिः विद्वद्वर–वामन–जयादित्यविनिर्मिता । (व्याकरणं ५) रु० ६—०

३८ प्राकृतप्रकाशः । भामहकृतः । श्रीमद्वररुचिप्रणीतप्राकृतसूत्रसहितः । टिप्पण्या च संयोजितः । (व्याकरणं ६) रु० १—४

३९ जीवन्मुक्तिविवेकः श्रीमद्विद्यारण्यस्वामिविरचितः । भाषानुवादसमेतः । (वेदान्तं ५) रु० २—०

४० श्रीनारदीयसंहिता । ब्रह्मणोपदिष्टो नारदमहामुनिप्रोक्तो ज्यौतिषग्रन्थः । (ज्योतिषं २) रु० ०—६

४१ मेदिनीकोशः–मेदिनीकारविरचितः । (कोशं १) रु० १—८

४२ मीमांसादर्शनम् । श्रीशबरस्वामिविरचितभाष्यसहितम् (भाग१—२) (मीमांसा ३) रु० १०—०

४३ न्यायदर्शनम् । श्रीगोतममुनिप्रणीतम् । श्रीवात्स्यायनमुनिप्रणीतभाष्यसहितम् । श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यविरचितन्यायसूत्रवृत्त्यनुगतम् । टिप्पण्यादिसहितम् (न्यायं ६) रु० ३—०

पत्रादिप्रेषणस्थानम्
२२—१—२७

जयकृष्णदास—हरिदासगुप्तः,
चौखम्बा संस्कृत सीरीज आफीस,
विद्याविलास प्रेस, गोपालमंदिर के उत्तर फाटक
बनारस सिटी।